Digitization by eGangotri-South Center

२१०५२५४

२ब नागरि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center.

विभक्तीनामुपयोगः

अधस्तनः श्लोकः रामशब्दस्य सप्तानां विभक्तीनाम् एकवचनेषु प्रयोगं दर्शयति—

प्र॰ श्रीरामः शरणं समस्तजगताम्
द्वि॰ रामं विना का गतिः
तृ॰ रामेण प्रतिहन्यते कलिमलम्
च॰ रामाय कार्यं नमः ।
प॰ रामात् त्रस्यति कालभीमभुजगः
ष॰ रामस्य सर्वं वशे
स॰ रामे भक्तिरखण्डिता भवतु मे
सं॰ राम त्वमेवाश्रयः ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीः

॥ शब्दमञ्जरी ॥

साधारणशब्दविभागः

अजन्तपुंलिङ्गप्रकरणम्

१. अकारान्तः पुंलिङ्गः 'राम' शब्दः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	रामः	रामौ	रामाः
सं. प्रथमा	हे राम	हे रामौ	हे रामाः
द्वितीया	रामम्	रामौ	रामान्
तृतीया	रामेण*	रामाभ्यां	रामैः
चतुर्थी	रामाय	रामाभ्यां	रामेभ्यः
पञ्चमी	रामात्	रामाभ्यां	रामेभ्यः
षष्ठी	रामस्य	रामयोः	रामाणाम्*
सप्तमी	रामे	रामयोः	रामेषु

एवं देव, मुकुन्द, शिव, हरप्रभृतयः

---

* ...e Instrumental Singular and Genitive ... the letter न् is changed to ण् if it comes ... or ऋ generally. cf. देवेन, मुकुन्देन, etc. *See* ...tra—रषाभ्यां नो णः समानपदे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२. इकारान्तः पुंलिङ्गः 'हरि' शब्दः

हरिः	हरी	हरयः
हे हरे	हे हरी	हे हरयः
हरिम्	हरी	हरीन्
हरिणा	हरिभ्यां	हरिभिः
हरये	हरिभ्यां	हरिभ्यः
हरेः	हरिभ्यां	हरिभ्यः
हरेः	हर्योः	हरीणाम्
हरौ	हर्योः	हरिषु

एवं रवि, कवि, मुनि, विधिप्रभृतयः

---

३. इकारान्तः पुंलिङ्गः 'पति'* शब्दः

पतिः	पती	पतयः
हे पते	हे पती	हे पतयः
पतिम्	पती	पतीन्
पत्या	पतिभ्यां	पति[illegible]
पत्ये	पतिभ्यां	प[illegible]

*पति and सखि are irregular bases in [illegible] word पति, however, when stands at t[illegible] compound is declined like हरि।

CC-0. In Public Domain. Cuddalore Collection. TN.

प.	पत्युः	पतिभ्यां	पतिभ्यः
ष.	पत्युः	पत्योः	पतीनाम्
स.	पत्यौ	पत्योः	पतिषु

---

४. इकारान्तः पुंलिङ्गः 'सखि' शब्दः

प्र.	सखा	सखायौ	सखायः
सं.प्र.	हे सखे	हे सखायौ	हे सखायः
द्वि.	सखायम्	सखायौ	सखीन्
तृ.	सख्या	सखिभ्यां	सखिभिः
च.	सख्ये	सखिभ्यां	सखिभ्यः
प.	सख्युः	सखिभ्यां	सखिभ्यः
ष.	सख्युः	सख्योः	सखीनाम्
स.	सख्यौ	सख्योः	सखिषु

---

५. उकारान्तः पुंलिङ्गः 'गुरु' शब्दः

प्र.	गुरुः	गुरू	गुरवः
[illegible]	हे गुरो	हे गुरू	हे गुरवः
[illegible]	गुरुम्	गुरू	गुरून्
[illegible]	गुरुणा	गुरुभ्यां	गुरुभिः
च.	गुरवे	गुरुभ्यां	गुरुभ्यः

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प.	गुरोः	गुरुभ्यां	गुरुभ्यः
ष.	गुरोः	गुर्वोः	गुरूणाम्
स.	गुरौ	गुर्वोः	गुरुषु

एवं शम्भु, विष्णु, भानु, सूनुप्रभृतयः

---

६. ऋकारान्तः पुंलिङ्गः 'कर्तृ' शब्दः

प्र.	कर्ता	कर्तारौ	कर्तारः
सं.प्र.	हे कर्तः	हे कर्तारौ	हे कर्तारः
द्वि.	कर्तारम्	कर्तारौ	कर्तॄन्
तृ.	कर्त्रा	कर्तृभ्यां	कर्तृभिः
च.	कर्त्रे	कर्तृभ्यां	कर्तृभ्यः
प.	कर्तुः	कर्तृभ्यां	कर्तृभ्यः
ष.	कर्तुः	कर्त्रोः	कर्तॄणाम्
स.	कर्तरि	कर्त्रोः	कर्तृषु

*एवं धातृ, भर्तृ, वक्तृप्रभृतयः । नप्तृशब्दोऽप्येवमेव ।

---

* Nouns derived from roots with तृ such as धातृ, दातृ etc. are to be declined l[illegible] They form their feminines by the addition o[illegible] दात्री etc.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

७. ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः

प्र.	पिता	पितरौ	पितरः
सं.प्र.	हे पितः	हे पितरौ	हे पितरः
द्वि.	पितरम्	पितरौ	पितॄन्
तृ.	पित्रा	पितृभ्यां	पितृभिः
च.	पित्रे	पितृभ्यां	पितृभ्यः
प.	पितुः	पितृभ्यां	पितृभ्यः
ष.	पितुः	पित्रोः	पितॄणाम्
स.	पितरि	पित्रोः	पितृषु

*एवं भ्रातृ, जामातृ, देवृ, नृप्रभृतयः । 'नृ' शब्दस्य षष्ठी-बहुवचने 'नृणां नॄणाम्' इति रूपद्वयं विशेषः ।

---

८. ** ऐकारान्तः पुंलिङ्गः 'रै' शब्दः

प्र.	राः	रायौ	रायः
सं.प्र.	हे राः	हे रायौ	हे रायः
द्वि.	रायम्	रायौ	रायः
तृ.	राया	राभ्यां	राभिः
[illegible]	राये	राभ्यां	राभ्यः
[illegible]	रायः	राभ्यां	राभ्यः

---

* [illegible]तृ, जामातृ, सव्येष्टृ, देवृ, नृ, भ्रातरः समाः ।

** [illegible]' शब्दः 'गो' शब्दश्च उभयलिङ्गौ, स्त्रीलिङ्गेऽप्येवमेव रूपाणि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष.	रायः	रायोः	रायाम्
स.	रायि	रायोः	रासु

९. ओकारान्तः पुंलिङ्गः 'गो' शब्दः

प्र.	गौः	गावौ	गावः
सं.प्र.	हे गौः	हे गावौ	हे गावः
द्वि.	गाम्	गावौ	गाः
तृ.	गवा	गोभ्यां	गोभिः
च.	गवे	गोभ्यां	गोभ्यः
प.	गोः	गोभ्यां	गोभ्यः
ष.	गोः	गवोः	गवाम्
स.	गवि	गवोः	गोषु

१०. औकारान्तः पुंलिङ्गः 'ग्लौ' शब्दः

प्र.	ग्लौः	ग्लावौ	ग्लावः
सं.प्र.	हे ग्लौः	हे ग्लावौ	हे ग्लावः
द्वि.	ग्लावम्	ग्लावौ	ग्लावः
तृ.	ग्लावा	ग्लौभ्यां	ग्लौभिः
च.	ग्लावे	ग्लौभ्यां	ग्लौभ्य[illegible]
प.	ग्लावः	ग्लौभ्यां	ग्लौ[illegible]
ष.	ग्लावः	ग्लावोः	ग्ल[illegible]
स.	ग्लावि	ग्लावोः	[illegible]

CC-0. In Public Domain. Cuddalore Collection. TN.

अथ अजन्तस्त्रीलिङ्गप्रकरणम्

११. * आकारान्तः स्त्रीलिङ्गः 'रमा' शब्दः

प्र.	रमा	रमे	रमाः
सं.प्र.	हे रमे	हे रमे	हे रमाः
द्वि.	रमाम्	रमे	रमाः
तृ.	रमया	रमाभ्यां	रमाभिः
च.	रमायै	रमाभ्यां	रमाभ्यः
प.	रमायाः	रमाभ्यां	रमाभ्यः
ष.	रमायाः	रमयोः	रमाणाम्
स.	रमायाम्	रमयोः	रमासु

एवं माला, सीता, क्षमा, लज्जाप्रभृतयः । 'अम्बा' शब्दोऽप्येवमेव; किन्तु तस्य सम्बोधनैकवचने 'हे अम्ब' इति विशेषः ।

---

१२. ** इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः

प्र.	मतिः	मती	मतयः
सं.प्र.	हे मते	हे मती	हे मतयः
[illegible]	मतिम्	मती	मतीः

---

* [illegible] अकारान्तो न विद्यते ।

** [illegible] abstract nouns ending in ति are to be [illegible] मति ।

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ.	मत्या	मतिभ्यां	मतिभिः
च.	मत्यै, मतये	मतिभ्यां	मतिभ्यः
प.	मत्याः, मतेः	मतिभ्यां	मतिभ्यः
ष.	मत्याः, मतेः	मत्योः	मतीनाम्
स.	मत्याम्, मतौ	मत्योः	मतिषु

एवं श्रुति, रुचि, बुद्धिप्रभृतयः

---

१२. ईकारान्तः स्त्रीलिङ्गः 'नदी' शब्दः

प्र.	नदी	नद्यौ	नद्यः
सं.प्र.	हे नदि	हे नद्यौ	हे नद्यः
द्वि.	नदीम्	नद्यौ	नदीः
तृ.	नद्या	नदीभ्यां	नदीभिः
च.	नद्यै	नदीभ्यां	नदीभ्यः
प.	नद्याः	नदीभ्यां	नदीभ्यः
ष.	नद्याः	नद्योः	नदीनाम्
स.	नद्याम्	नद्योः	नदीषु

एवं गौरी, वाणी, सखी, देवीप्रभृतयः । 'लक्ष्मी'* श[illegible] तु प्रथमैकवचने 'लक्ष्मीः' इति सविसर्गं रूपम् ।

---

* लक्ष्मी, तरी and तन्त्री do not lose their वि[illegible] the Nominative Singular.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१४. ईकारान्तः स्त्रीलिङ्गः 'धी' * शब्दः

प्र.	धीः	धियौ	धियः
सं.प्र.	हे धीः	हे धियौ	हे धियः
द्वि.	धियम्	धियौ	धियः
तृ.	धिया	धीभ्यां	धीभिः
च.	धियै, धिये	धीभ्यां	धीभ्यः
प.	धियाः, धियः	धीभ्यां	धीभ्यः
ष.	धियाः, धियः	धियोः	धीनाम्, धियाम्
स.	धियाम्, धियि	धियोः	धीषु

एवं ह्री, श्री, भीप्रभृतयः

---

१५. ईकारान्तः स्त्रीलिङ्गः 'स्त्री' शब्दः

प्र.	स्त्री	स्त्रियौ	स्त्रियः
सं.प्र.	हे स्त्रि	हे स्त्रियौ	हे स्त्रियः
द्वि.	स्त्रियम्, स्त्रीम्	स्त्रियौ	स्त्रियः, स्त्रीः
[illegible]	स्त्रिया	स्त्रीभ्यां	स्त्रीभिः

---

* These four words धी, ह्री, श्री and भी also do not drop their विसर्ग in the Nominative Singular.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च.	स्त्रियै	स्त्रीभ्यां	स्त्रीभ्यः
प.	स्त्रियाः	स्त्रीभ्यां	स्त्रीभ्यः
ष.	स्त्रियाः	स्त्रियोः	स्त्रीणाम्
स.	स्त्रियाम्	स्त्रियोः	स्त्रीषु

---

१६. उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः

प्र.	धेनुः	धेनू	धेनवः
सं.प्र.	हे धेनो	हे धेनू	हे धेनवः
द्वि.	धेनुम्	धेनू	धेनूः
तृ.	धेन्वा	धेनुभ्यां	धेनुभिः
च.	*धेन्वै, धेनवे	धेनुभ्यां	धेनुभ्यः
प.	धेन्वाः, धेनोः	धेनुभ्यां	धेनुभ्यः
ष.	धेन्वाः, धेनोः	धेन्वोः	धेनूनाम्
स.	धेन्वाम्, धेनौ	धेन्वोः	धेनुषु

एवं तनु, इषु, रज्जु, चञ्चुप्रभृतयः

---

*Note that the स्त्रीलिङ्ग words ending in इ an[d उ] have two forms in the Dative, Ablative, Geni[tive] and the Locative Singulars.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१७. ऊकारान्तः स्त्रीलिङ्गः 'वधू' शब्दः

प्र.	वधूः	वध्वौ	वध्वः
सं.प्र.	हे वधु	हे वध्वौ	हे वध्वः
द्वि.	वधूम्	वध्वौ	वधूः
तृ.	वध्वा	वधूभ्यां	वधूभिः
च.	वध्वै	वधूभ्यां	वधूभ्यः
प.	वध्वाः	वधूभ्यां	वधूभ्यः
ष.	वध्वाः	वध्वोः	वधूनाम्
स.	वध्वाम्	वध्वोः	वधूषु

एवं चमू, श्वश्रूप्रभृतयः

---

१८. ऊकारान्तः स्त्रीलिङ्गः 'भू' शब्दः

प्र.	भूः	भुवौ	भुवः
सं.प्र.	हे भूः	हे भुवौ	हे भुवः
द्वि.	भुवम्	भुवौ	भुवः
तृ.	भुवा	भूभ्यां	भूभिः
च.	भुवै, भुवे	भूभ्यां	भूभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पं.	भुवाः, भुवः	भूभ्यां	भूभ्यः
ष.	भुवाः, भुवः	भुवोः	भूनाम्, भुवाम्
स.	भुवाम्, भुवि	भुवोः	भूषु

एवं भ्रू, सुभ्रूप्रभृतयः

---

१९. ऋकारान्तः स्त्रीलिङ्गः 'स्वसृ'* शब्दः

प्र	स्वसा	स्वसारौ	स्वसारः
सं.प्र.	हे स्वसः	हे स्वसारौ	हे स्वसारः
द्वि.	स्वसारम्	स्वसारौ	स्वसॄः
तृ.	स्वस्रा	स्वसृभ्यां	स्वसृभिः
च.	स्वस्रे	स्वसृभ्यां	स्वसृभ्यः
प.	स्वसुः	स्वसृभ्यां	स्वसृभ्यः
ष.	स्वसुः	स्वस्रोः	स्वसॄणाम्
स.	स्वसरि	स्वस्रोः	स्वसृषु

---

* The words स्वसृ, मातृ, यातृ, दुहितृ and ननान्दृ being themselves feminine do not take the feminine termination ई। See foot-notes on page 10.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२०. ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः

प्र.	माता	मातरौ	मातरः
सं.प्र.	हे मातः	हे मातरौ	हे मातरः
द्वि.	मातरम्	मातरौ	मातॄः
तृ.	मात्रा	मातृभ्यां	मातृभिः
च.	मात्रे	मातृभ्यां	मातृभ्यः
प.	मातुः	मातृभ्यां	मातृभ्यः
ष.	मातुः	मात्रोः	मातॄणाम्
स.	मातरि	मात्रोः	मातृषु

एवं यातृ, दुहितृ, ननान्दृशब्दाः

---

२१. ऐकारान्तः स्त्रीलिङ्गः 'रै' शब्दः

पुंलिङ्गवत्

---

२२. ओकारान्तः स्त्रीलिङ्गः 'द्यो' शब्दः

'गो' शब्दवत्

---

२३. औकारान्तः स्त्रीलिङ्गः 'नौ' शब्दः

'ग्लौ' शब्दवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अजन्तनपुंसकलिङ्गप्रकरणम्

२४. अकारान्तनपुंसकलिङ्गः 'फल' शब्दः

प्र.	फलम्	फले	फलानि
सं.प्र.	हे फल	हे फले	हे फलानि
द्वि.	फलम्	फले	फलानि

फलेन इत्यादि अकारान्तपुंलिङ्गवत् ।

एवं ज्ञान, वन, धन, नेत्रप्रभृतयः ।

---

२५. इकारान्तनपुंसकलिङ्गः 'वारि' शब्दः

प्र.	वारि	वारिणी	वारीणि
सं.प्र.	*हे वारे, हे वारि	हे वारिणी	हे वारीणि
द्वि.	वारि	वारिणी	वारीणि
तृ.	वारिणा	वारिभ्यां	वारिभिः
च.	वारिणे	वारिभ्यां	वारिभ्यः
प.	वारिणः	वारिभ्यां	वारिभ्यः
ष.	वारिणः	वारिणोः	वारीणाम्
स.	वारिणि	वारिणोः	वारिषु

* The neuter words ending in इ, उ have two forms in the Vocative Singular.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

२६. इकारान्तनपुंसकलिङ्गः 'दधि' शब्दः

प्र.	दधि	दधिनी	दधीनि
सं.प्र.	हे दधे, हे दधि	हे दधिनी	हे दधीनि
द्वि.	दधि	दधिनी	दधीनि
तृ.	दध्ना	दधिभ्यां	दधिभिः
च.	दध्ने	दधिभ्यां	दधिभ्यः
प.	दध्नः	दधिभ्यां	दधिभ्यः
ष.	दध्नः	दध्नोः	दध्नाम्
स.	दध्नि, दधनि	दध्नोः	दधिषु

एवं अस्थि, सक्थि, अक्षिशब्दाः

---

२७. इकारान्तनपुंसकलिङ्गः 'शुचि' शब्दः

प्र.	शुचि	शुचिनी	शुचीनि
सं.प्र.	हे शुचे, हे शुचि	हे शुचिनी	हे शुचीनि
द्वि.	शुचि	शुचिनी	शुचीनि
तृ.	शुचिना	शुचिभ्यां	शुचिभिः
च.	*शुचिने, शुचये	शुचिभ्यां	शुचिभ्यः

*The adjectives (neuter) ending in इ, उ and ...ve two forms in the चतुर्थी, पञ्चमी, षष्ठी and सप्तमी ...ulars and षष्ठी, सप्तमी Duals, one form being the ... the form of nouns ending in the respective

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प.	शुचिनः, शुचेः	शुचिभ्यां	शुचिभ्यः
ष.	शुचिनः, शुचेः	शुचिनोः, शुच्योः	शुचीनाम्
स.	शुचिनि, शुचौ	शुचिनोः, शुच्योः	शुचिषु

एवं अनादि, सुरभिप्रभृतयः

---

२८. उकारान्तनपुंसकलिङ्गः 'मधु' शब्दः

प्र.	मधु	मधुनी	मधूनि
सं.प्र.	हे मधो, हे मधु	हे मधुनी	हे मधूनि
द्वि.	मधु	मधुनी	मधूनि
तृ.	मधुना	मधुभ्यां	मधुभिः
च.	मधुने	मधुभ्यां	मधुभ्यः
प.	मधुनः	मधुभ्यां	मधुभ्यः
ष.	मधुनः	मधुनोः	मधूनाम्
स.	मधुनि	मधुनोः	मधुषु

एवं अम्बु, अश्रु, वस्तु, दारुप्रभृतयः

---

२९. उकारान्तनपुंसकलिङ्गः 'गुरु' शब्दः

प्र.	गुरु	गुरुणी	गुरूणि
सं.प्र.	हे गुरो, हे गुरु	हे गुरुणी	हे गुरूणि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वि.	गुरु	गुरुणी	गुरूणि
तृ.	गुरुणा	गुरुभ्यां	गुरुभिः
च.	गुरुणे, गुरवे	गुरुभ्यां	गुरुभ्यः
प.	गुरुणः, गुरोः	गुरुभ्यां	गुरुभ्यः
ष.	गुरुणः, गुरोः	गुरुणोः, गुर्वोः	गुरूणाम्
स.	गुरुणि, गुरौ	गुरुणोः, गुर्वोः	गुरुषु

एवं मृदु, पृथु, पटु, लघुप्रभृतयः

---

३०. ऋकारान्तनपुंसकलिङ्गः 'दातृ' शब्दः

प्र.	दातृ	दातृणी	दातॄणि
सं.प्र.	हे दातः, हे दातृ	हे दातृणी	हे दातॄणि
द्वि.	दातृ	दातृणी	दातॄणि
तृ.	दातृणा, दात्रा	दातृभ्यां	दातृभिः
च.	दातृणे, दात्रे	दातृभ्यां	दातृभ्यः
प.	दातृणः, दातुः	दातृभ्यां	दातृभ्यः
ष.	दातृणः, दातुः	दातृणोः, दात्रोः	दातॄणाम्
स.	दातृणि, दातरि	दातृणोः, दात्रोः	दातृषु

एवं कर्तृ, गन्तृ, वक्तृप्रभृतयः

नपुंसके एकारान्ताः ऐकारान्ताः ओकारान्ताः औका-रान्ताश्च न विद्यन्ते ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हलन्तपुंलिङ्गप्रकरणम्

३१. चकारान्तः पुंलिङ्गः 'जलमुच्' शब्दः

प्र.	जलमुक्*	जलमुचौ	जलमुचः
सं.प्र.	हे जलमुक्	हे जलमुचौ	हे जलमुचः
द्वि.	जलमुचम्	जलमुचौ	जलमुचः
तृ.	जलमुचा	जलमुग्भ्यां	जलमुग्भिः
च.	जलमुचे	जलमुग्भ्यां	जलमुग्भ्यः
प.	जलमुचः	जलमुग्भ्यां	जलमुग्भ्यः
ष.	जलमुचः	जलमुचोः	जलमुचाम्
स.	जलमुचि	जलमुचोः	जलमुक्षु

एवं पयोमुच्, सुवाच्प्रभृतयः

---

३२. जकारान्तः पुंलिङ्गः 'वणिज्' शब्दः

प्र.	वणिक्	वणिजौ	वणिजः
सं.प्र.	हे वणिक्	हे वणिजौ	हे वणिजः

---

*The final च् or ज् is changed to क् followed by a hard consonant or by nothing ... ग् when followed by a soft consonant.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वि.	वणिजम्	वणिजौ	वणिजः
तृ.	वणिजा	वणिग्भ्यां	वणिग्भिः
च.	वणिजे	वणिग्भ्यां	वणिग्भ्यः
प.	वणिजः	वणिग्भ्यां	वणिग्भ्यः
ष.	वणिजः	वणिजोः	वणिजाम्
स.	वणिजि	वणिजोः	वणिक्षु

एवं भिषज्, हुतभुज्, ऋत्विज्प्रभृतयः

---

३३. जकारान्तः पुंलिङ्गः 'राज्' शब्दः

प्र.	राट्*	राजौ	राजः
सं.प्र.	हे राट्	हे राजौ	हे राजः
द्वि.	राजम्	राजौ	राजः
तृ.	राजा	राड्भ्यां	राड्भिः
च.	राजे	राड्भ्यां	राड्भ्यः
प.	राजः	राड्भ्यां	राड्भ्यः
[illegible]	राजः	राजोः	राजाम्

---

*The final of व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज् and [illegible] are changed to ट् ro ड्. The ज् of परिव्राज् is [illegible] changed to ट् or ड्.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स.	राजि	राजोः	राट्सु

एवं सम्राज्, परिव्राज्, विश्वसृज्प्रभृतयः

---

३४. तकारान्तः पुंलिङ्गः 'मरुत्'* शब्दः

प्र.	मरुत्	मरुतौ	मरुतः
सं.प्र.	हे मरुत्	हे मरुतौ	हे मरुतः
द्वि.	मरुतम्	मरुतौ	मरुतः
तृ.	मरुता	मरुद्भ्यां	मरुद्भिः
च.	मरुते	मरुद्भ्यां	मरुद्भ्यः
प.	मरुतः	मरुद्भ्यां	मरुद्भ्यः
ष.	मरुतः	मरुतोः	मरुताम्
स.	मरुति	मरुतोः	मरुत्सु

एवं भूभृत्, कर्मकृत्, विश्वजित्, सोमसुत् प्रभृतयः। ददत्, दधत्, बिभ्यत्; जक्षत्, जाग्रत्, शासत्, चकासत्, दरिद्रत्प्रभृतयोऽप्येवमेव ॥

---

*The Present Participles of roots of the third conjugation and the participles जक्षत् etc. are declined like मरुत्.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३५. तकारान्तः पुंलिङ्गः 'पचत्' शब्दः

प्र.	*पचन्	पचन्तौ	पचन्तः
सं.प्र.	हे पचन्	हे पचन्तौ	हे पचन्तः
द्वि.	पचन्तम्	पचन्तौ	पचतः

शेषं 'मरुत्' शब्दवत् ।

एवं गच्छत्, गमिष्यत्, हरत्, हरिष्यत्, कुर्वत्, करिष्यत्, कथयत्, कथयिष्यत्प्रभृतयः ।

---

३६. तकारान्तः पुंलिङ्गः 'धीमत्' शब्दः

प्र.	धीमान्	धीमन्तौ	धीमन्तः
सं.प्र.	हे धीमन्	हे धीमन्तौ	हे धीमन्तः
द्वि.	धीमन्तम्	धीमन्तौ	धीमतः

शेषं पुंलिङ्ग 'मरुत्' शब्दवत् ।

एवं बुद्धिमत्, धनवत्, कृतवत्, भगवत्, यावत्, तावत्, कियत्, इयत्प्रभृतयः । 'मघवत्' शब्दोऽप्येवमेव ॥

---

*Decline all other Participles of the Present and the Future Parasmaipada in the masculine similarly.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३७. तकारान्तः पुंलिङ्गः 'महत्'* शब्दः

प्र.	महान्	महान्तौ	महान्तः
सं.प्र.	हे महन्	हे महान्तौ	हे महान्तः
द्वि.	महान्तम्	महान्तौ	महतः

शेषं 'मरुत्' शब्दवत्

---

३८. दकारान्तः पुंलिङ्गः 'सुहृद्' शब्दः

प्र.	सुहृत्	सुहृदौ	सुहृदः
सं.प्र.	हे सुहृत्	हे सुहृदौ	हे सुहृदः
द्वि.	सुहृदम्	सुहृदौ	सुहृदः
तृ.	सुहृदा	सुहृद्भ्यां	सुहृद्भिः
च.	सुहृदे	सुहृद्भ्यां	सुहृद्भ्यः
प.	सुहृदः	सुहृद्भ्यां	सुहृद्भ्यः
ष.	सुहृदः	सुहृदोः	सुहृदाम्
स.	सुहृदि	सुहृदोः	सुहृत्सु

एवं दिविषद्, शास्त्रविद्, तमोनुद्प्रभृतयः

---

*पचन्, धीमान्, महान् इत्येते त्रिविधा अपि तकारान्ताः स्त्रियाम् ईकारान्ता भवन्ति ; पचन्ती, धीमती, महती इति तेषां स्त्रीलिङ्गाणि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

३९. नकारान्तः पुंलिङ्गः 'राजन्'* शब्दः

प्र.	राजा	राजानौ	राजानः
सं.प्र.	हे राजन्	हे राजानौ	हे राजानः
द्वि.	राजानम्	राजानौ	राज्ञः
तृ.	राज्ञा	राजभ्यां	राजभिः
च.	राज्ञे	राजभ्यां	राजभ्यः
प.	राज्ञः	राजभ्यां	राजभ्यः
ष.	राज्ञः	राज्ञोः	राज्ञाम्
स.	राज्ञि, राजनि	राज्ञोः	राजसु

एवं मूर्धन्, तक्षन्, सुनामन्, महिमन्, पीवन्, अणिमन्, गरिमन्, लघिमन्प्रभृतयः ।

४०. नकारान्तः पुंलिङ्गः 'आत्मन्' शब्दः

प्र.	**आत्मा	आत्मानौ	आत्मानः
सं.प्र.	हे आत्मन्	हे आत्मानौ	हे आत्मानः
द्वि.	आत्मानम्	आत्मानौ	आत्मनः

*राजन् शब्दस्य स्त्रियां 'राज्ञी' इति रूपम्।

**The words ending in अन् preceded by a conjunct consonant having म् or व् for its latter member belong to this class.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ.	आत्मना	आत्मभ्यां	आत्मभिः
च.	आत्मने	आत्मभ्यां	आत्मभ्यः
प.	आत्मनः	आत्मभ्यां	आत्मभ्यः
ष.	आत्मनः	आत्मनोः	आत्मनाम्
स.	आत्मनि	आत्मनोः	आत्मसु

एवं ब्रह्मन्, सुपर्वन्, अध्वन्प्रभृतयः

---

४१. नकारान्तः पुंलिङ्गः 'श्वन्'* शब्दः

प्र.	*श्वा	श्वानौ	श्वानः
सं.प्र.	हे श्वन्	हे श्वानौ	हे श्वानः
द्वि.	श्वानम्	श्वानौ	शुनः
तृ.	शुना	श्वभ्यां	श्वभिः
च.	शुने	श्वभ्यां	श्वभ्यः
प.	शुनः	श्वभ्यां	श्वभ्यः
ष.	शुनः	शुनोः	शुनाम्
स.	शुनि	शुनोः	श्वसु

---

*श्वन् शब्दः स्त्रियां 'शुनी' इति ईकारान्तो भवति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४२. नकारान्तः पुंलिङ्गः 'युवन्'* शब्दः

प्र.	युवा	युवानौ	युवानः
सं.प्र.	हे युवन्	हे युवानौ	हे युवानः
द्वि.	युवानम्	युवानौ	यूनः
तृ.	यूना	युवभ्यां	युवभिः
च.	यूने	युवभ्यां	युवभ्यः
प.	यूनः	युवभ्यां	युवभ्यः
ष.	यूनः	यूनोः	यूनाम्
स.	यूनि	यूनोः	युवसु

---

४३. नकारान्तः पुंलिङ्गः 'मघवन्' शब्दः

प्र.	**मघवा	मघवानौ	मघवानः
सं.प्र.	हे मघवन्	हे मघवानौ	हे मघवानः
द्वि.	मघवानम्	मघवानौ	मघोनः
तृ.	मघोना	मघवभ्यां	मघवभिः
च.	मघोने	मघवभ्यां	मघवभ्यः
प.	मघोनः	मघवभ्यां	मघवभ्यः

---

*युवन् शब्दस्य स्त्रियां 'युवतिः' इति रूपम् । 'युवती' इत्यप्यस्ति ।

**Note the word 'मघवत्' given under the 36th word.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष.	मघोनः	मघोनोः	मघोनाम्
स.	मघोनि	मघोनोः	मघवसु

---

४४. नकारान्तः पुंलिङ्गः 'पथिन्' शब्दः

प्र.	पन्थाः	पन्थानौ	पन्थानः
सं.प्र.	हे पन्थाः	हे पन्थानौ	हे पन्थानः
द्वि.	पन्थानम्	पन्थानौ	पथः
तृ.	पथा	पथिभ्यां	पथिभिः
च.	पथे	पथिभ्यां	पथिभ्यः
प.	पथः	पथिभ्यां	पथिभ्यः
ष.	पथः	पथोः	पथाम्
स.	पथि	पथोः	पथिषु

एवं मथिन् शब्दः

---

४५. नकारान्तः पुंलिङ्गः 'करिन्' शब्दः

प्र.	*करी	करिणौ	करिणः
सं.प्र.	हे करिन्	हे करिणौ	हे करिणः

---

* एतद्वर्गीयाः शब्दाः स्त्रियां ईकारान्ता भवन्ति; करिणी, गुणिनी इत्यादि रूपाणि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

T. S. R. Rowdman

द्वि.	करिणम्	करिणौ	करिणः
तृ.	करिणा	करिभ्यां	करिभिः
च.	करिणे	करिभ्यां	करिभ्यः
प.	करिणः	करिभ्यां	करिभ्यः
ष.	करिणः	करिणोः	करिणाम्
स.	करिणि	करिणोः	करिषु

एवं गुणिन्, धनिन्, शशिन्प्रभृतयः

T. S. Radha

४६. शकारान्तः पुंलिङ्गः 'विश्' शब्दः

प्र.	*विट्	विशौ	विशः
सं.प्र.	हे विट्	हे विशौ	हे विशः
द्वि.	विशम्	विशौ	विशः
तृ.	विशा	विड्भ्यां	विड्भिः
च.	विशे	विड्भ्यां	विड्भ्यः
प.	विशः	विड्भ्यां	विड्भ्यः
ष.	विशः	विशोः	विशाम्
स.	विशि	विशोः	विट्सु

* The ending श् of root-nouns is changed to ट् or ड्. But the श of दिश्, दृश् and स्पृश् is changed to क् or ग्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

४७. शकारान्तः पुंलिङ्गः 'तादृश्' शब्दः

प्र.	*तादृक्	तादृशौ	तादृशः
सं.प्र.	हे तादृक्	हे तादृशौ	हे तादृशः
द्वि.	तादृशम्	तादृशौ	तादृशः
तृ.	तादृशा	तादृग्भ्यां	तादृग्भिः
च.	तादृशे	तादृग्भ्यां	तादृग्भ्यः
प.	तादृशः	तादृग्भ्यां	तादृग्भ्यः
ष.	तादृशः	तादृशोः	तादृशाम्
स.	तादृशि	तादृशोः	तादृक्षु

एवं ईदृश्, मादृश्, त्वादृश्, अस्मादृश्, युष्मादृश्, भवादृश्, तत्त्वदृश्प्रभृतयः ।

---

४८. षकारान्तः पुंलिङ्गः 'द्विष्' शब्दः

प्र.	द्विट्	द्विषौ	द्विषः
सं.प्र.	हे द्विट्	हे द्विषौ	हे द्विषः
द्वि.	द्विषम्	द्विषौ	द्विषः
तृ.	द्विषा	द्विड्भ्यां	द्विड्भिः
च.	द्विषे	द्विड्भ्यां	द्विड्भ्यः

---

*एतेषां स्त्रियां 'तादृशी, ईदृशी' इत्यादीनि ईकारान्तानि रूपाणि। एते शब्दाः पुंलिङ्गे 'तादृशः, ईदृशः' इत्येवम् अकारान्तत्वेनापि प्रयुज्यन्ते। तेषां तु स्त्रियां 'तादृशा, ईदृशा' इत्येवं रूपाणि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प.	द्विषः	द्विड्भ्यां	द्विड्भ्यः
ष.	द्विषः	द्विषोः	द्विषाम्
स.	द्विषि	द्विषोः	द्विट्सु

एवं रत्नमुष्, सितत्विष्प्रभृतयः

---

४९. सकारान्तः पुंलिङ्गः 'वेधस्' शब्दः

प्र.	वेधाः	वेधसौ	वेधसः
सं.प्र.	हे वेधः	हे वेधसौ	हे वेधसः
द्वि.	वेधसम्	वेधसौ	वेधसः
तृ.	वेधसा	वेधोभ्यां	वेधोभिः
च.	वेधसे	वेधोभ्यां	वेधोभ्यः
प.	वेधसः	वेधोभ्यां	वेधोभ्यः
ष.	वेधसः	वेधसोः	वेधसाम्
स.	वेधसि	वेधसोः	वेधस्सु

एवं चन्द्रमस्, सुमनस्, पुरोधस्प्रभृतयः

---

५०. सकारान्तः पुंलिङ्गः 'श्रेयस्' शब्दः

प्र.	*श्रेयान्	श्रेयांसौ	श्रेयांसः
सं.प्र.	हे श्रेयन्	हे श्रेयांसौ	हे श्रेयांसः

*एतद्वर्गीयाः शब्दाः स्त्रियां 'श्रेयसी, गरीयसी' इत्येवमीकारान्ता भवन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वि.	श्रेयांसम्	श्रेयांसौ	श्रेयसः
तृ.	श्रेयसा	श्रेयोभ्यां	श्रेयोभिः
च.	श्रेयसे	श्रेयोभ्यां	श्रेयोभ्यः
प.	श्रेयसः	श्रेयोभ्यां	श्रेयोभ्यः
ष.	श्रेयसः	श्रेयसोः	श्रेयसाम्
स.	श्रेयसि	श्रेयसोः	श्रेयस्सु

एवं गरीयस्, स्थवीयस्प्रभृतयः

---

५१. सकारान्तः पुंलिङ्गः 'विद्वस्' शब्दः

प्र.	*विद्वान्	विद्वांसौ	विद्वांसः
सं.प्र.	हे विद्वन्	हे विद्वांसौ	हे विद्वांसः
द्वि.	विद्वांसम्	विद्वांसौ	विदुषः
तृ.	विदुषा	विद्वद्भ्यां	विद्वद्भिः
च.	विदुषे	विद्वद्भ्यां	विद्वद्भ्यः
प.	विदुषः	विद्वद्भ्यां	विद्वद्भ्यः
ष.	विदुषः	विदुषोः	विदुषाम्
स.	विदुषि	विदुषोः	विद्वत्सु

एवं ऊचिवस्, उपेयिवस्, सेदिवस्, तस्थिवस्प्रभृतयः

---

*एतद्वर्गीया अपि स्त्रियाम् ईकारान्ता भवन्ति । यथा—विदुषी, ऊचुषी, उपेयुषी, सेदुषी, तस्थुषी इत्यादि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

S. Savithri.
III Form R.

५२. सकारान्तः पुंलिङ्गः 'पुंस्' शब्दः

प्र.	पुमान्	पुमांसौ	पुमांसः
सं.प्र.	हे पुमन्	हे पुमांसौ	हे पुमांसः
द्वि.	पुमांसम्	पुमांसौ	पुंसः
तृ.	पुंसा	पुम्भ्यां	पुम्भिः
च.	पुंसे	पुम्भ्यां	पुम्भ्यः
प.	पुंसः	पुम्भ्यां	पुम्भ्यः
ष.	पुंसः	पुंसोः	पुंसाम्
स.	पुंसि	पुंसोः	पुंसु

---

५३. सकारान्तः पुंलिङ्गः 'दोस्' शब्दः

प्र.	दोः	दोषौ	दोषः
सं.प्र.	हे दोः	हे दोषौ	हे दोषः
द्वि.	दोषम्	दोषौ	दोषः
तृ.	दोषा	दोर्भ्यां	दोर्भिः
च.	दोषे	दोर्भ्यां	दोर्भ्यः
प.	दोषः	दोर्भ्यां	दोर्भ्यः
ष.	दोषः	दोषोः	दोषाम्
स.	दोषि	दोषोः	दोष्षु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

५४. हकारान्तः पुंलिङ्गः 'लिह्' शब्दः

प्र.	लिट्	लिहौ	लिहः
सं.प्र.	हे लिट्	हे लिहौ	हे लिहः
द्वि.	लिहम्	लिहौ	लिहः
तृ.	लिहा	लिड्भ्यां	लिड्भिः
च.	लिहे	लिड्भ्यां	लिड्भ्यः
प.	लिहः	लिड्भ्यां	लिड्भ्यः
ष.	लिहः	लिहोः	लिहाम्
स.	लिहि	लिहोः	लिट्सु

एवं भूरुह्, महीरुह्प्रभृतयः

हलन्तस्त्रीलिङ्गप्रकरणम्

हलन्तेषु केचन शब्दाः स्त्रियामीकारान्ता भवन्ति । ये शब्दा ईकारान्ता न भवन्ति ते तत्तदन्ताः पुंलिङ्गशब्दा इव द्रष्टव्याः । तथा हि—

५५. चकारान्तः स्त्रीलिङ्गः 'वाच्' शब्दः 'जलमुच्' शब्दवत् ।

एवं त्वच्, रुच्प्रभृतयः

---

५६. जकारान्तः स्त्रीलिङ्गः 'स्रज्' शब्दः 'वणिज्' शब्दवत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हलन्तस्त्रीलिङ्गसाधारणशब्दाः

५७. तकारान्तः स्त्रीलिङ्गः 'सरित्' शब्दः 'मरुत्' शब्दवत्।
एवं हरित्, तटित्प्रभृतयः

---

५८. दकारान्तः स्त्रीलिङ्गः 'शरद्' शब्दः 'सुहृद्' शब्दवत्।
एवं सम्पद्, आपद्, मृद्प्रभृतयः

५९. धकारान्तः स्त्रीलिङ्गः 'क्षुध्' शब्दः

प्र.	क्षुत्	क्षुधौ	क्षुधः
सं.प्र.	हे क्षुत्	हे क्षुधौ	हे क्षुधः
द्वि.	क्षुधम्	क्षुधौ	क्षुधः
तृ.	क्षुधा	क्षुद्भ्यां	क्षुद्भिः
च.	क्षुधे	क्षुद्भ्यां	क्षुद्भ्यः
प.	क्षुधः	क्षुद्भ्यां	क्षुद्भ्यः
ष.	क्षुधः	क्षुधोः	क्षुधाम्
स.	क्षुधि	क्षुधोः	क्षुत्सु

एवं युध्, समिध्, वीरुध्प्रभृतयः। पुंलिङ्गेऽपि भवन्तः 'मर्माविध्' प्रभृतयोऽप्येवमेव ज्ञेयाः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६०. नकारान्तः स्त्रीलिङ्गः 'सीमन्'* शब्दः 'राजन्' शब्दवत्।
एवं दामन्प्रभृतयः

---

६१. पकारान्तः स्त्रीलिङ्गः 'अप्' शब्दः
(नित्यं बहुवचनान्तः)

आपः, आपः, अपः, अद्भिः, अद्भ्यः, अद्भ्यः, अपाम्, अप्सु

---

६२. भकारान्तः स्त्रीलिङ्गः 'ककुभ्' शब्दः

प्र.	ककुप्	ककुभौ	ककुभः
सं.प्र.	हे ककुप्	हे ककुभौ	हे ककुभः
द्वि.	ककुभम्	ककुभौ	ककुभः
तृ.	ककुभा	ककुब्भ्यां	ककुब्भिः
च.	ककुभे	ककुब्भ्यां	ककुब्भ्यः
प.	ककुभः	ककुब्भ्यां	ककुब्भ्यः
ष.	ककुभः	ककुभोः	ककुभाम्
स.	ककुभि	ककुभोः	ककुप्सु

* The words सीमन्, दामन् formed by the addition of मन् do not take the feminine termination ई though they end in न्. These words are, however, optionally declined like feminine words ending in आ ; सीमा, सीमे, सीमाः etc.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६३. रेफान्तः स्त्रीलिङ्गः 'गिर्' शब्दः

प्र.	गीः	गिरौ	गिरः
सं.प्र.	हे गीः	हे गिरौ	हे गिरः
द्वि.	गिरम्	गिरौ	गिरः
तृ.	गिरा	गीर्भ्यां	गीर्भिः
च.	गिरे	गीर्भ्यां	गीर्भ्यः
प.	गिरः	गीर्भ्यां	गीर्भ्यः
ष.	गिरः	गिरोः	गिराम्
स.	गिरि	गिरोः	गीर्षु

एवं धूर्, पूर्प्रभृतयः

---

६४. वकारान्तः स्त्रीलिङ्गः 'दिव्' शब्दः

प्र.	* द्यौः	दिवौ	दिवः
सं.प्र.	हे द्यौः	हे दिवौ	हे दिवः
द्वि.	दिवम्	दिवौ	दिवः
तृ.	दिवा	द्युभ्यां	द्युभिः
च.	दिवे	द्युभ्यां	द्युभ्यः
प.	दिवः	द्युभ्यां	द्युभ्यः
ष.	दिवः	दिवोः	दिवाम्
स.	दिवि	दिवोः	द्युषु

* Note the other mode of declension—23rd शब्द.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

६५. शकारान्तः स्त्रीलिङ्गः 'दिश्' शब्दः पुंलिङ्ग 'तादृश्' शब्दवत्।

---

६६. शकारान्तः स्त्रीलिङ्गः 'निश्' शब्दः 'विश्' शब्दवत्। एवं विपाश्प्रभृतयः

---

६७. षकारान्तः स्त्रीलिङ्गः 'प्रावृष्' शब्दः 'द्विष्' शब्दवत्। एवं त्विष्प्रभृतयः

---

६८. सकारान्तः स्त्रीलिङ्गः 'भास्' शब्दः

प्र.	भाः	भासौ	भासः
सं.प्र.	हे भाः	हे भासौ	हे भासः
द्वि.	भासम्	भासौ	भासः
तृ.	भासा	भाभ्यां	भाभिः
च.	भासे	भाभ्यां	भाभ्यः
प.	भासः	भाभ्यां	भाभ्यः
ष.	भासः	भासोः	भासाम्
स.	भासि	भासोः	भास्सु

---

६९. सकारान्तः स्त्रीलिङ्गः 'आशिस्' शब्दः

प्र.	आशीः	आशिषौ	आशिषः
सं.प्र.	हे आशीः	हे आशिषौ	हे आशिषः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

T.S.B

T.S.B T.S.B

द्वि.	आशिषम्	आशिषौ	आशिषः
तृ.	आशिषा	आशीर्भ्यां	आशीर्भिः
च.	आशिषे	आशीर्भ्यां	आशीर्भ्यः
प.	आशिषः	आशीर्भ्यां	आशीर्भ्यः
ष.	आशिषः	आशिषोः	आशिषाम्
स.	आशिषि	आशिषोः	आशीष्षु

---

७०. हकारान्तः स्त्रीलिङ्गः 'उपानह्' शब्दः

प्र.	उपानत्	उपानहौ	उपानहः
सं.प्र.	हे उपानत्	हे उपानहौ	हे उपानहः
द्वि.	उपानहम्	उपानहौ	उपानहः
तृ.	उपानहा	उपानद्भ्यां	उपानद्भिः
च.	उपानहे	उपानद्भ्यां	उपानद्भ्यः
प.	उपानहः	उपानद्भ्यां	उपानद्भ्यः
ष.	उपानहः	उपानहोः	उपानहाम्
स.	उपानहि	उपानहोः	उपानत्सु

हलन्तनपुंसकलिङ्गप्रकरणम्

७१. चकारान्तनपुंसकलिङ्गः 'सुवाच्' शब्दः

प्र.	सुवाक्	सुवाची	सुवाञ्चि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे सुवाक्	हे सुवाची	हे सुवाञ्चि
द्वि.	सुवाक्	सुवाची	सुवाञ्चि

शेषं पुंवत्

---

७२. जकारान्तनपुंसकलिङ्गः 'भाज्' शब्दः

प्र.	भाक्	भाजी	भाञ्जि
सं.प्र.	हे भाक्	हे भाजी	हे भाञ्जि
द्वि.	भाक्	भाजी	भाञ्जि

शेषं 'वणिज्' शब्दवत्

---

७३. तकारान्तनपुंसकलिङ्गः 'महत्' शब्दः

प्र.	महत्	महती	महान्ति
सं.प्र.	हे महत्	हे महती	हे महान्ति
द्वि.	महत्	महती	महान्ति

शेषं पुंवत्

---

७४. तकारान्तनपुंसकलिङ्गः 'जगत्' शब्दः

प्र.	जगत्	जगती	जगन्ति
सं.प्र.	हे जगत्	हे जगती	हे जगन्ति
द्वि.	जगत्	जगती	जगन्ति

शेषं 'मरुत्' शब्दवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

*एवं भास्वत्, गतवत्, सुन्वत्, तन्वत्, रुन्धत्, क्रीणत्, अदत्, बृहत्, पृषत्प्रभृतयः।

---

७५. तकारान्तनपुंसकलिङ्गः 'ददत्' शब्दः

प्र.	ददत्	ददती	ददति, ददन्ति
सं.प्र.	हे ददत्	हे ददती	हे ददति, हे ददन्ति
द्वि.	ददत्	ददती	ददति, ददन्ति

शेषं पुंवत्

**एवं जुह्वत्, शासत्, जक्षत्, चकासत्, दरिद्रत्, जाग्रत्प्रभृतयः।

---

७६. तकारान्तनपुंसकलिङ्गः 'तुदत्' शब्दः

प्र.	तुदत्	तुदन्ती, तुदती	तुदन्ति
सं.प्र.	हे तुदत्	हे तुदन्ती, हे तुदती	हे तुदन्ति
द्वि.	तुदत्	तुदन्ती, तुदती	तुदन्ति

शेषं 'जगत्' शब्दवत्

---

*मत्वन्ताः, वत्वन्ताः, स्वादि-तनादि-रुधादि-क्र्यादिधातुभ्यो निष्पन्नाः शत्रन्ताः, अदादौ आकारान्तवर्जितधातुभ्यो निष्पन्नाः शत्रन्ताः, बृहत्-पृषत्प्रभृतयः शब्दाश्च एवं ज्ञेयाः।

**अभ्यस्तधातुभ्यः (जुहोत्यादिभ्यः यङ्लुगन्तेभ्यश्च) निष्पन्नाः शत्रन्ताः शासत्प्रभृतयश्च एवं द्रष्टव्याः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

*एवं पृच्छत्, मुञ्चत्, यात्, भात्, करिष्यत्प्रभृतयः ।

---

७७. तकारान्तनपुंसकलिङ्गः 'पचत्' शब्दः

प्र.	पचत्	पचन्ती	पचन्ति
सं.प्र.	हे पचत्	हे पचन्ती	हे पचन्ति
द्वि.	पचत्	पचन्ती	पचन्ति

शेषं 'जगत्' शब्दवत्

**एवं भवत्, दीव्यत्, चोरयत्, चिकीर्षत्, पुत्रीयत् प्रभृतयः ।

---

७८. दकारान्तनपुंसकलिङ्गः 'हृद्' शब्दः

प्र.	हृत्	हृदी	हृन्दि
सं.प्र.	हे हृत्	हे हृदी	हृन्दि
द्वि.	हृत्	हृदी	हृन्दि

शेषं 'सुहृद्' शब्दवत्

---

७९. नकारान्तनपुंसकलिङ्गः 'कर्मन्' शब्दः

प्र.	कर्म	कर्मणी	कर्माणि

---

*तुदादिभ्यः अदादौ आकारान्तेभ्यश्च धातुभ्यो निष्पन्नाः शत्रन्ताः लृटो निष्पन्नाः शत्रन्ताश्च अस्मिन् वर्गेऽन्तर्भवन्ति ।

**भ्वादि-दिवादि-चुरादि-सनन्त-नामधातुभ्यो निष्पन्नाः शत्रन्ता एवंविधाः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे कर्मन्, हे कर्म	हे कर्मणी	हे कर्माणि
द्वि.	कर्म	कर्मणी	कर्माणि

शेषं 'आत्मन्' शब्दवत्

एवं शर्मन्, वर्मन्, वेश्मन्, सद्मन्प्रभृतयः

---

८०. नकारान्तनपुंसकलिङ्गः 'नामन्' शब्दः

प्र.	नाम	नाम्नी, नामनी	नामानि
सं.प्र.	हे नामन्, हे नाम	हे नाम्नी, हे नामनी	हे नामानि
द्वि.	नाम	नाम्नी, नामनी	नामानि

शेषं 'राजन्' शब्दवत्

एवं धामन्, व्योमन्, हेमन्प्रभृतयः

---

८१. नकारान्तनपुंसकलिङ्गः 'गुणिन्' शब्दः

प्र.	गुणि	गुणिनी	गुणीनि
सं.प्र.	हे गुणिन्, हे गुणि	हे गुणिनी	हे गुणीनि
द्वि.	गुणि	गुणिनी	गुणीनि

शेषं 'करिन्' शब्दवत्

एवं कुशलिन्, वाग्मिन्, दण्डिन्प्रभृतयः

---

८२. नकारान्तनपुंसकलिङ्गः 'अहन्' शब्दः

प्र.	अहः	अह्नी, अहनी	अहानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे अहः	हे अह्नी, हे अहनी	हे अहानि
द्वि.	अहः	अह्नी, अहनी	अहानि
तृ.	अह्ना	अहोभ्यां	अहोभिः
च.	अह्ने	अहोभ्यां	अहोभ्यः
प.	अह्नः	अहोभ्यां	अहोभ्यः
ष.	अह्नः	अह्नोः	अह्नाम्
स.	अह्नि, अहनि	अह्नोः	अहस्सु

---

८३. रेफान्तनपुंसकलिङ्गः 'वार्' शब्दः

प्र.	वाः	वारी	वारि
सं.प्र.	हे वाः	हे वारी	हे वारि
द्वि.	वाः	हे वारी	हे वारि

शेषं 'गिर्' शब्दवत्

---

८४. शकारान्तनपुंसकलिङ्गः 'तादृश्' शब्दः

प्र.	तादृक्	तादृशी	तादृंशि
सं.प्र.	हे तादृक्	तादृशी	हे तादृंशि
द्वि.	तादृक्	तादृशी	तादृंशि

शेषं पुंवत्

एवं एतादृश्, ईदृश्, कीदृश्प्रभृतयः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

८५. षकारान्तनपुंसकलिङ्गः 'सुत्विष्' शब्दः

प्र.	सुत्विट्	सुत्विषी	सुत्वींषि
सं.प्र.	हे सुत्विट्	हे सुत्विषी	हे सुत्वींषि
द्वि.	सुत्विट्	सुत्विषी	सुत्वींषि

शेषं 'त्विष्' शब्दवत् । एवं रत्नमुष्प्रभृतयः ।

---

८६. सकारान्तनपुंसकलिङ्गः 'मनस्' शब्दः

प्र.	मनः	मनसी	मनांसि
सं.प्र.	हे मनः	हे मनसी	हे मनांसि
द्वि.	मनः	मनसी	मनांसि

शेषं 'वेधस्' शब्दवत् । एवं तपस्, यशस्प्रभृतयः । गरीयस्, श्रेयस्प्रभृतयः ईयसन्ता अपि क्लीबे एवमेव ।

---

८७. सकारान्तनपुंसकलिङ्गः 'हविस्' शब्दः

प्र.	हविः	हविषी	हवींषि
सं.प्र.	हे हविः	हे हविषी	हे हवींषि
द्वि.	हविः	हविषी	हवींषि
तृ.	हविषा	हविर्भ्यां	हविर्भिः

4

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च.	हविषे	हविर्भ्याम्	हविर्भ्यः
प.	हविषः	हविर्भ्याम्	हविर्भ्यः
ष.	हविषः	हविषोः	हविषाम्
स.	हविषि	हविषोः	हविस्सु

एवं सर्पिस्, ज्योतिस्, रोचिस्, आयुस्, चक्षुस्, धनुस्, वपुस्प्रभृतयः ।

---

८८. सकारान्तनपुंसकलिङ्गः 'तस्थिवस्' शब्दः

प्र.	तस्थिवत्	तस्थुषी	तस्थिवांसि
सं.प्र.	हे तस्थिवत्	हे तस्थुषी	हे तस्थिवांसि
द्वि.	तस्थिवत्	तस्थुषी	तस्थिवांसि

शेषं पुंवत् । एवं ऊचिवस्, उपेयिवस्प्रभृतयः

---

८९. हकारान्तनपुंसकलिङ्गः 'अम्भोरुह्' शब्दः

प्र.	अम्भोरुट्	अम्भोरुही	अम्भोरुंहि
सं.प्र.	हे अम्भोरुट्	हे अम्भोरुही	हे अम्भोरुंहि
द्वि.	अम्भोरुट्	अम्भोरुही	अम्भोरुंहि

शेषं 'लिह्' शब्दवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ सर्वनामप्रकरणम्

प्रधानभूताः सर्वनामशब्दाः

१. सर्व, विश्व, कतर, कतम, एकतर, एकतम, अन्य, अन्यतर*, इतर, सम**, एक†, द्वि शब्दाः ।

२. पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर शब्दाः ।

३. उभ, उभयशब्दौ ।

४. ‡तद्, एतद्, इदम्, अदस्, यद्, किम्, युष्मद्, अस्मद् शब्दाः ।

५. भवत् शब्दः ।

---

१०. अकारान्तः पुंलिङ्गः 'सर्व' शब्दः

प्र.	सर्वः	सर्वौ	सर्वे
सं.प्र.	हे सर्व	हे सर्वौ	सर्वे
द्वि.	सर्वम्	सर्वौ	सर्वान्

---

*अन्यतम is not a pronoun as it is not mentioned in the सर्वादि group. It is, therefore, declined like राम.

**समः सर्वपर्यायः, तुल्यपर्यायस्तु रामशब्दवत् ।

†एक, द्विशब्दौ सङ्ख्याशब्दप्रकरणे द्रष्टव्यौ ।

‡तदादीनां चतुर्णामर्थभेदः—

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ.	सर्वेण	सर्वाभ्यां	सर्वैः
च.	सर्वस्मै	सर्वाभ्यां	सर्वेभ्यः
प.	सर्वस्मात्	सर्वाभ्यां	सर्वेभ्यः
ष.	सर्वस्य	सर्वयोः	सर्वेषाम्
स.	सर्वस्मिन्	सर्वयोः	सर्वेषु

एवं प्रथमवर्गीयाः 'विश्वा'दयः

---

९१. स्त्रीलिङ्गे

प्र.	सर्वा	सर्वे	सर्वाः
सं.प्र.	हे सर्वे	हे सर्वे	हे सर्वाः
द्वि.	सर्वाम्	सर्वे	सर्वाः
तृ.	सर्वया	सर्वाभ्यां	सर्वाभिः
च.	सर्वस्यै	सर्वाभ्यां	सर्वाभ्यः
प.	सर्वस्याः	सर्वाभ्यां	सर्वाभ्यः
ष.	सर्वस्याः	सर्वयोः	सर्वासाम्
स.	सर्वस्याम्	सर्वयोः	सर्वासु

एवं प्रथमवर्गीया 'विश्व' प्रभृतयः

---

९२. नपुंसकलिङ्गे

प्र.	सर्वम्	सर्वे	सर्वाणि
सं.प्र.	हे सर्व	हे सर्वे	हे सर्वाणि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वि.	सर्वम्	सर्वे	सर्वाणि

शेषं पुंवत्

एवं विश्व, एकतर, समशब्दाः । इतरेषां तु कतरत्, कतमत्, एकतमत्, अन्यत्, अन्यतरत्, इतरत् इत्येवं प्रथमाद्वितीयैकवचनयोः सम्बुद्धौ च रूपाणि ।

---

९३. अकारान्तः पुंलिङ्गः 'पूर्व' शब्दः

प्र.	पूर्वः	पूर्वौ	पूर्वे, पूर्वाः
सं.प्र.	हे पूर्व	हे पूर्वौ	हे पूर्वे, हे पूर्वाः
द्वि.	पूर्वम्	पूर्वौ	हे पूर्वान्
तृ.	पूर्वेण	पूर्वाभ्यां	पूर्वैः
च.	पूर्वस्मै	पूर्वाभ्यां	पूर्वेभ्यः
प.	पूर्वस्मात्, पूर्वात्	पूर्वाभ्यां	पूर्वेभ्यः
ष.	पूर्वस्य	पूर्वयोः	पूर्वेषाम
स.	पूर्वस्मिन्, पूर्वे	पूर्वयोः	पूर्वेषु

एवं द्वितीयवर्गीयाः 'पर' प्रभृतयः

---

९४. स्त्रीलिङ्गे 'सर्वा' शब्दवत् । एवं द्वितीयवर्गीयाः 'पर' प्रभृतयः ।

---

९५. नपुंसकलिङ्गे

प्र.	पूर्वम्	पूर्वे	पूर्वाणि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे पूर्व	हे पूर्वे	हे पूर्वाणि
द्वि.	पूर्वम्	पूर्वे	पूर्वाणि

शेषं पुंवत् । एवं द्वितीयवर्गीयाः 'पर' प्रभृतयः ।

अकारान्तः 'उभ' शब्दः (नित्यं द्विवचनान्तः)

	९६. पुंसि	९७. स्त्रियाम्	९८. क्लीबे
प्र.	उभौ	उभे	उभे
द्वि.	उभौ	उभे	उभे
तृ.	उभाभ्यां	उभाभ्यां	उभाभ्यां
च.	उभाभ्यां	उभाभ्यां	उभाभ्यां
प.	उभाभ्यां	उभाभ्यां	उभाभ्यां
ष.	उभयोः	उभयोः	उभयोः
स.	उभयोः	उभयो	उभयोः

---

९९. अकारान्तः पुंलिङ्गः 'उभय' शब्दः (अस्य द्विवचनं नास्ति)

	एकवचनम्	बहुवचनम्
प्र.	उभयः	उभये
सं.प्र.	हे उभय	हे उभये
द्वि.	उभयम्	उभयान्
तृ.	उभयेन	उभयैः
च.	उभयस्मै	उभयेभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प.	उभयस्मात्	उभयेभ्यः
ष.	उभयस्य	उभयेषाम्
स.	उभयस्मिन्	उभयेषु

---

१००. स्त्रियाम् 'उभयी' इति 'नदी' शब्दवत् । (द्विवचनं तु नास्ति)

---

१०१. नपुंसकलिङ्गे प्रथमासम्बोधनद्वितीयासु 'फल' शब्दवत् । शेषं पुंवत् । (अत्रापि द्विवचनं नास्ति)

---

*दकारान्तः 'तद्' शब्दः

१०२. पुंलिङ्गे

प्र.	सः	तौ	ते
द्वि.	तम्	तौ	तान्
तृ.	तेन	ताभ्यां	तैः
च.	तस्मै	ताभ्यां	तेभ्यः
प.	तस्मात्	ताभ्यां	तेभ्यः
ष.	तस्य	तयोः	तेषाम्
स.	तस्मिन्	तयोः	तेषु

* एतदाद्यानां सर्वनाम्नां सम्बोधनं नास्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१०३. स्त्रीलिङ्गे

प्र.	सा	ते	ताः
द्वि.	ताम्	ते	ताः
तृ.	तया	ताभ्यां	ताभिः
च.	तस्यै	ताभ्यां	ताभ्यः
प.	तस्याः	ताभ्यां	ताभ्यः
ष.	तस्याः	तयोः	तासाम्
स.	तस्याम्	तयोः	तासु

१०४. नपुंसकलिङ्गे

प्र.	तत्	ते	तानि
द्वि.	तत्	ते	तानि

शेषं पुंवत्

दकारान्तः 'एतद्' शब्दः

१०५. पुंलिङ्गे

प्र.	*एषः	एतौ	एते
द्वि.	एतम्, एनम्	एतौ, एनौ	एतान्, एनान्

* The विसर्ग of सः and एषः is dropped when followed by any letter except अ। In the latter case the प्रश्लेषसन्धि takes place; स गच्छति, एष गच्छति but सोऽगच्छत्, एषोऽगच्छत् etc.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ॰	एतेन, एनेन	एताभ्यां	एतैः
च.	एतस्मै	एताभ्यां	एतेभ्यः
प.	एतस्मात्	एताभ्यां	एतेभ्यः
ष.	एतस्य	एतयोः, एनयोः	एतेषाम्
स.	एतस्मिन्	एतयोः, एनयोः	एतेषु

---

१०६. स्त्रीलिङ्गे

प्र.	एषा	एते	एताः
द्वि.	एताम्, एनाम्	एते, एने	एताः, एनाः
तृ.	एतया, एनया	एताभ्यां	एताभिः
च.	एतस्यै	एताभ्यां	एताभ्यः
प.	एतस्याः	एताभ्यां	एताभ्यः
ष.	एतस्याः	एतयोः, एनयोः	एतासाम्
स.	एतस्याम्	एतयोः, एनयोः	एतासु

---

१०७. नपुंसकलिङ्गे

प्र.	एतत्	एते	एतानि
द्वि.	एतत्, एनत्	एते, एने	एतानि, एनानि

शेषं पुंवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दकारान्तः 'यद्' शब्दः

१०८. पुंलिङ्गे

प्र.	यः	यौ	ये
द्वि.	यम्	यौ	यान्
तृ.	येन	याभ्यां	यैः
च.	यस्मै	याभ्यां	येभ्यः
प.	यस्मात्	याभ्यां	येभ्यः
ष.	यस्य	ययोः	येषाम्
स.	यस्मिन्	ययोः	येषु

---

१०९. स्त्रीलिङ्गे

प्र.	या	ये	याः
द्वि.	याम्	ये	याः
तृ.	यया	याभ्यां	याभिः
च.	यस्यै	याभ्यां	याभ्यः
प.	यस्याः	याभ्यां	याभ्यः
ष.	यस्याः	ययोः	यासाम्
स.	यस्यां	ययोः	यासु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११०. नपुंसकलिङ्गे

प्र.	यत्	ये	यानि
द्वि.	यत्	ये	यानि

शेषं पुंवत्.

१११. दकारान्तः 'युष्मद्' शब्दः (त्रिषु लिङ्गेषु समानरूपः)

प्र.	*त्वम्	युवाम्	यूयम्
द्वि.	त्वाम्, त्वा	युवाम्, वां	युष्मान्, वः
तृ.	त्वया	युवाभ्यां	युष्माभिः
च.	तुभ्यं, ते	युवाभ्यां, वां	युष्मभ्यं, वः
प.	त्वत्	युवाभ्यां	युष्मत्
ष.	तव, ते	युवयोः, वां	युष्माकं, वः
स.	त्वयि	युवयोः	युष्मासु

---

११२. दकारान्तः 'अस्मद्' शब्दः (त्रिषु लिङ्गेषु समानरूपः)

प्र.	अहम्	आवाम्	वयम्

*The optional shorter forms of अस्मद् and युष्मद् are never used at the beginning of a sentence or of a foot of a metre, nor can they be used immediately before the particles च, वा, ह, हा, अह and एव ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वि.	माम्, मा	आवाम्, नौ	अस्मान्, नः
तृ.	मया	आवाभ्यां	अस्माभिः
चं.	मह्यं, मे	आवाभ्यां, नौ	अस्मभ्यं, नः
प.	मत्	आवाभ्यां	अस्मत्
ष.	मम, मे	आवयोः, नौ	अस्माकं, नः
स.	मयि	आवयोः	अस्मासु

मकारान्तः 'किम्' शब्दः

११३. पुंलिङ्गे

प्र.	*कः	कौ	के
द्वि.	कम्	कौ	कान्
तृ.	केन	काभ्यां	कैः
च.	कस्मै	काभ्यां	केभ्यः
प.	कस्मात्	काभ्यां	केभ्यः
ष.	कस्य	कयोः	केषाम्
स.	कस्मिन्	कयोः	केषु

*Indefinite pronouns are formed by the addition of चित्, चन or अपि to the various cases of this word in all the genders. *e. g.* कश्चित्, कश्चन, कोऽपि, केनचित्, कयाचन, कस्यापि etc.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

११४. स्त्रीलिङ्गे

प्र.	का	के	काः
द्वि.	काम्	के	काः
तृ.	कया	काभ्यां	काभिः
च.	कस्यै	काभ्यां	काभ्यः
प.	कस्याः	काभ्यां	काभ्यः
ष.	कस्याः	कयोः	कासाम्
स.	कस्याम्	कयोः	कासु

११५. नपुंसकलिङ्गे

प्र.	किम्	के	कानि
द्वि.	किम्	के	कानि

शेषं पुंवत्.

मकारान्तः 'इदम्' शब्दः

११६. पुंलिङ्गे

प्र.	अयम्	इमौ	इमे
द्वि.	*इमम्, एनम्	इमौ, एनौ	इमान्, एनान्

*The optional forms of एतद् and इदम् are to be used when there is अन्वादेश, *i. e.*, when their proper forms have already been used in a previous clause; अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापय etc. अन्वादेश means the subsequent mention of a thing already mentioned.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ.	अनेन, एनेन	आभ्यां	एभिः
च.	अस्मै	आभ्यां	एभ्यः
प.	अस्मात्	आभ्यां	एभ्यः
ष.	अस्य	अनयोः, एनयोः	एषाम्
स.	अस्मिन्	अनयोः, एनयोः	एषु

---

११७. स्त्रीलिङ्गे

प्र.	इयम्	इमे	इमाः
द्वि.	इमाम्, एनाम्	इमे, एने	इमाः, एनाः
तृ.	अनया, एनया	आभ्यां	आभिः
च.	अस्यै	आभ्यां	आभ्यः
प.	अस्याः	आभ्यां	आभ्यः
ष.	अस्याः	अनयोः, एनयोः	आसाम्
स.	अस्याम्	अनयोः, एनयोः	आसु

---

११८. नपुंसकलिङ्गे

प्र.	इदम्	इमे	इमानि
द्वि.	इदम्, एनत्	इमे, एने	इमानि, एनानि

शेषं पुंवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वनामशब्दाः

सकारान्तः 'अदस्' शब्दः

११९. पुंलिङ्गे

प्र.	असौ	अमू	अमी
द्वि.	अमुम्	अमू	अमून्
तृ.	अमुना	अमूभ्यां	अमीभिः
च.	अमुष्मै	अमूभ्यां	अमीभ्यः
प.	अमुष्मात्	अमूभ्यां	अमीभ्यः
ष.	अमुष्य	अमुयोः	अमीषाम्
स.	अमुष्मिन्	अमुयोः	अमीषु

---

१२०. स्त्रीलिङ्गे

प्र.	असौ	अमू	अमूः
द्वि.	अमूम्	अमू	अमूः
तृ.	अमुया	अमूभ्यां	अमूभिः
च.	अमुष्यै	अमूभ्यां	अमूभ्यः
प.	अमुष्याः	अमूभ्यां	अमूभ्यः
ष.	अमुष्याः	अमुयोः	अमूषाम्
स.	अमुष्याम्	अमुयोः	अमूषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center.

१२१. नपुंसकलिङ्गे

प्र.	अदः	अमू	अमूनि
द्वि.	अदः	अमू	अमूनि

शेषं पुंवत्

तकारान्तः 'भवत्' शब्दः

१२२. पुंलिङ्गे

प्र.	*भवान्	भवन्तौ	भवन्तः

इत्यादि 'धीमत्' शब्दवत्

---

१२३. स्त्रीलिङ्गे

प्र.	भवती	भवत्यौ	भवत्यः

इत्यादि 'नदी' शब्दवत्

---

१२४. नपुंसकलिङ्गे

प्र.	भवत्	भवती	भवन्ति

इत्यादि 'जगत्' शब्दवत्

---

* भवच्छब्दयोगे प्रथमपुरुष एव प्रयोक्तव्यः, न तु मध्यमपुरुषः, यथा—भवान् गच्छति, भवती वदतीत्यादि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ सङ्ख्याशब्दाः

अकारान्तः *'एक' शब्दः (नित्यमेकवचनः)

	१२५. पुंसि	१२६. स्त्रियाम्	१२७. क्लीबे
प्र.	एकः	एका	एकम्
द्वि.	एकम्	एकाम्	एकम्
तृ.	एकेन	एकया	एकेन
च.	एकस्मै	एकस्यै	एकस्मै
प.	एकस्मात्	एकस्याः	एकस्मात्
ष.	एकस्य	एकस्याः	एकस्य
स.	एकस्मिन्	एकस्याम्	एकस्मिन्

सङ्ख्याव्यतिरिक्तेष्वर्थेष्वस्य द्विवचनबहुवचने अपि स्तः । तदा अस्य 'सर्व' शब्दस्येव रूपाणि ।

इकारान्तः 'द्वि' शब्दः (नित्यं द्विवचनः)

	१२८. पुंसि	१२९. स्त्रियाम्	१३०. क्लीबे
प्र.	द्वौ	द्वे	द्वे
द्वि.	द्वौ	द्वे	द्वे

---

*एक when means 'one' is declined only in the Singular but in other senses it is declined in the Dual and Plural also. The various meanings of एक are:— एकोऽल्पार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽपि सङ्ख्यायां च प्रयुज्यते ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ.	द्वाभ्यां	द्वाभ्यां	द्वाभ्यां
च.	द्वाभ्यां	द्वाभ्यां	द्वाभ्यां
प.	द्वाभ्यां	द्वाभ्यां	द्वाभ्यां
ष.	द्वयोः	द्वयोः	द्वयोः
स.	द्वयोः	द्वयोः	द्वयोः

इकारान्तः 'त्रि' शब्दः (नित्यं बहुवचनः)

	१३१. पुंसि	१३२. स्त्रियाम्	१३३. क्लीबे
प्र.	त्रयः	तिस्रः	त्रीणि
द्वि.	त्रीन्	तिस्रः	त्रीणि
तृ.	त्रिभिः	तिसृभिः	त्रिभिः
च	त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
प.	त्रिभ्यः	तिसृभ्यः	त्रिभ्यः
ष.	त्रयाणाम्	तिसृणाम्	त्रयाणाम्
स.	त्रिषु	तिसृषु	त्रिषु

रेफान्तः 'चतुर्' शब्दः (नित्यं बहुवचनः)

	१३४. पुंसि	१३५. स्त्रियाम्	१३६. क्लीबे
प्र.	चत्वारः	चतस्रः	चत्वारि
द्वि.	चतुरः	चतस्रः	चत्वारि
तृ.	चतुर्भिः	चतसृभिः	चतुर्भिः
च.	चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प.	चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः
ष.	चतुर्णाम्	चतसृणाम्	चतुर्णाम्
स.	चतुर्षु	चतसृषु	चतुर्षु

पञ्चादयः नवदशपर्यन्ताः शब्दाः त्रिषु लिङ्गेषु सरूपाः, नित्यं बहुवचनाश्च ।

१३७. पञ्चन् (नान्तः) १३८. षष् (षान्तः) १३९. सप्तन् (नान्तः)

	१३७. पञ्चन्	१३८. षष्	१३९. सप्तन्
प्र.	पञ्च	षट्	सप्त
द्वि.	पञ्च	षट्	सप्त
तृ.	पञ्चभिः	षड्भिः	सप्तभिः
च.	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः
प.	पञ्चभ्यः	षड्भ्यः	सप्तभ्यः
ष.	पञ्चानाम्	षण्णाम्	सप्तानाम्
स.	पञ्चसु	षट्सु	सप्तसु

नकारान्तः 'अष्टन्' शब्दः (अस्य द्विविधं रूपम्)

१४०. प्रथमं रूपम्

	प्रथमं रूपम्	द्वितीयं रूपम्
प्र.	अष्ट	अष्टौ
द्वि.	अष्ट	अष्टौ
तृ.	अष्टभिः	अष्टाभिः
च.	अष्टभ्यः	अष्टाभ्यः
प.	अष्टभ्यः	अष्टाभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष.	अष्टानाम्	अष्टानाम्
स.	अष्टसु	अष्टासु

नवप्रभृतयो नवदशपर्यन्ताः 'सप्तन्' शब्दवत्

विंशत्यादयः

विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः एते स्त्रीलिङ्गाः। त्रिंशत्प्रभृतयस्त्रयः तकारान्ताः, अन्ये इकारान्ता इति विशेषः। एतेषां विशेषणतया प्रयोगे एकवचनमेव, यथा—विंशतिः कुमाराः इत्यादि। विशेष्यतया प्रयोगे तु द्विवचनबहुवचने अपि स्तः। यथा—द्वे विंशती, तिस्रः विंशतयः गवाम् इत्यादि। अत्र इकारान्तानां 'मति' शब्दवत्, तकारान्तानां 'सरित्' शब्दवच्च रूपाणि द्रष्टव्यानि॥

शत-सहस्र-अयुत-लक्ष-प्रयुतशब्दाः अकारान्त-नपुंसकलिङ्गाः; कोटिशब्द इकारान्तः स्त्रीलिङ्गश्च। एतेषामपि विशेषणतया प्रयोगे एकवचनमेव, यथा—शतं जनाः, सहस्रं स्त्रियः इत्यादि। विशेष्यतया प्रयोगे तु द्विवचन-बहुवचने अपि भवतः, यथा—द्वे शते, त्रीणि सहस्राणि इति॥

---

१४१. इकारान्तः 'कति' शब्दः (नित्यं बहुवचनः)
(त्रिषु लिङ्गेषु सरूपः)

कति, कति, कतिभिः, कतिभ्यः, कतिभ्यः, कतीनाम्, कतिषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकारान्तः 'प्रथम' शब्दः

१४२. पुंलिङ्गे

प्र.	प्रथमः	प्रथमौ	प्रथमे, प्रथमाः
सं.प्र.	हे प्रथम	प्रथमौ	हे प्रथमे, हे प्रथमाः

शेषं 'राम' शब्दवत्

एवं चरम-अल्प-अर्ध-कतिपय-द्वय-द्वितय-त्रय-त्रितय-चतुष्टयप्रभृतयः ।

---

१४३. स्त्रीलिङ्गे

प्र.	प्रथमा	प्रथमे	प्रथमाः

इत्यादि 'रमा' शब्दवत् । एवं चरमादयोऽपि ।

---

१४४. नपुंसकलिङ्गे

प्र.	प्रथमम्	प्रथमे	प्रथमानि

इत्यादि 'फल' शब्दवत् । चरमादयोऽप्येवमेव ।

अकारान्तः 'द्वितीय' शब्दः

१४५. पुंलिङ्गे

प्र.	*द्वितीयः	द्वितीयौ	द्वितीयाः

---

* द्वितीय and तृतीय are optionally declined like सर्व in the Dative, Ablative and Locative Singulars.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे द्वितीय	हे द्वितीयौ	हे द्वितीयाः
द्वि.	द्वितीयम्	द्वितीयौ	द्वितीयान्
तृ.	द्वितीयेन	द्वितीयाभ्यां	द्वितीयैः
च.	द्वितीयस्मै, द्वितीयाय	द्वितीयाभ्यां	द्वितीयेभ्यः
प.	द्वितीयस्मात्, द्वितीयात्	द्वितीयाभ्यां	द्वितीयेभ्यः
ष.	द्वितीयस्य	द्वितीययोः	द्वितीयानाम्
स.	द्वितीयास्मिन्, द्वितीये	द्वितीययोः	द्वितीयेषु

एवं 'तृतीय' शब्दः

---

१४६. स्त्रीलिङ्गे

चतुर्थी-पञ्चमी-सप्तम्येकवचनेषु 'द्वितीयस्यै, द्वितीयायै' इत्यादि रूपद्वयं विशेषः। अन्यत् सर्वं 'रमा' शब्दवत्। एवं तृतीयशब्दोऽपि।

---

१४७. नपुंसकलिङ्गे

प्र.	द्वितीयम्	द्वितीये	द्वितीयानि
सं.प्र.	हे द्वितीय	हे द्वितीये	हे द्वितीयानि
द्वि.	द्वितीयम्	द्वितीये	द्वितीयानि

शेषं पुंवत्। एवं तृतीयशब्दः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थ-पञ्चमादयः सर्वे पुंसि 'राम' शब्दवत्, स्त्रियां 'नदी'-शब्दवत्, क्लीबे 'फल' शब्दवच्च द्रष्टव्याः। अत्र शतपर्यन्ताः सङ्ख्याशब्दाः तेभ्यो निष्पन्नाः पूरणप्रत्ययान्ता विशेषणशब्दाश्च प्रदर्श्यन्ते—

सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्	सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्
१. एकः	प्रथमः-मा	४. चत्वारः	चतुर्थः-र्थी
२. द्वौ	द्वितीयः-या		तुरीयः-या
३. त्रयः	तृतीयः-या		तुर्यः -र्या

The ordinals or पूरणप्रत्ययान्तs from एक, द्वि, त्रि, चतुर् and षष् are irregularly formed; from other numerals upto दशन् they are formed by dropping the final न् and adding म. The ordinals from एकादशन् to नवदशन् are formed by dropping the final न्. From विंशति upto पञ्चाशत् they are formed by dropping ति of विंशति and the final consonant of त्रिंशत्, चत्वारिंशत् and पञ्चाशत्. These are also formed by adding तम optionally. The ordinals from षष्टि above are formed by adding तम while their compounds एकषष्टि etc. are also formed by changing their final इ to अ; एकषष्टितम, एकषष्ट, एकसप्ततितम, एकसप्तत etc. but षष्टितम, सप्ततितम, अशीतितम and नवतितम only.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्	सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्
५. पञ्च	पञ्चमः-मी	१६. षोडश	
६. षट्	षष्ठः-ष्ठी	१७. सप्तदश	
७. सप्त	सप्तमः-मी	१८. अष्टादश	
८. अष्ट	अष्टमः-मी	१९. नवदश	
९. नव	नवमः-मी	२०. विंशतिः	विंशः-शी विंशतितमः-मी
१०. दश	दशमः-मी		
११. एकादश	एकादशः-शी	२१. एकविंशतिः	
१२. द्वादश	द्वादशः-शी	२२. द्वाविंशतिः	
१३. त्रयोदश		२३. त्रयोविंशतिः	
१४. चतुर्दश		२४. चतुर्विंशतिः	
१५. पञ्चदश		२५. पञ्चविंशतिः	

In the compounds of सङ्ख्याशब्दs द्वि, त्रि and अष्टन् are changed to द्वा, त्रयः and अष्टा necessarily before दशन्, विंशति and त्रिंशत् and optionally before the rest except अशीति before which they remain unchanged. Thus we have the following optional forms:—

द्विचत्वारिंशत्	त्रिचत्वारिंशत्	अष्टाचत्वारिंशत्
द्विपञ्चाशत्	त्रिपञ्चाशत्	अष्टापञ्चाशत्
द्विषष्टि	त्रिषष्टि	अष्टाषष्टि
द्विसप्तति	त्रिसप्तति	अष्टासप्तति
द्विनवति	त्रिनवति	अष्टानवति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्
२६. षड्विंशतिः	
२७. सप्तविंशतिः	
२८. अष्टाविंशतिः	
२९. नवविंशतिः	
३०. त्रिंशत्	त्रिंशः-शी त्रिंशत्तमः-मी
३१. एकत्रिंशत्	
३२. द्वात्रिंशत्	
३३. त्रयस्त्रिंशत्	
३४. चतुस्त्रिंशत्	
३५. पञ्चत्रिंशत्	
३६. षट्त्रिंशत्	
३७. सप्तत्रिंशत्	
३८. अष्टात्रिंशत्	
३९. नवत्रिंशत्	
४०. चत्वारिंशत्	–रिंशः-शी चत्वारिंशत्तमः-मी
४१. एकचत्वारिंशत्	
४२. द्वाचत्वारिंशत्	
४३. त्रयश्चत्वारिंशत्	
४४. चतुश्चत्वारिंशत्	
४५. पञ्चचत्वारिंशत्	
४६. षट्चत्वारिंशत्	

सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्
४७. सप्तचत्वारिंशत्	
४८. अष्टचत्वारिंशत्	
४९. नवचत्वारिंशत्	
५०. पञ्चाशत्	पञ्चाशः-शी पञ्चाशत्तमः-मी
५१. एकपञ्चाशत्	
५२. द्वापञ्चाशत्	
५३. त्रयःपञ्चाशत्	
५४. चतुःपञ्चाशत्	
५५. पञ्चपञ्चाशत्	
५६. षट्पञ्चाशत्	
५७. सप्तपञ्चाशत्	
५८. अष्टपञ्चाशत्	
५९. नवपञ्चाशत्	
६०. षष्टिः	षष्टितमः-मी
६१. एकषष्टिः	एकषष्टः-ष्टी एकषष्टितमः-मी
६२. द्वाषष्टिः	
६३. त्रयःषष्टिः	
६४. चतुःषष्टिः	
६५. पञ्चषष्टिः	
६६. षट्षष्टिः	
६७. सप्तषष्टिः	

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्ख्याशब्दाः	पूरणप्रत्ययान्ताः पुंसि-स्त्रियाम्
६८. अष्टषष्टिः	
६९. नवषष्टिः	
७०. सप्ततिः	सप्ततितमः
७१. एकसप्ततिः	एकसप्ततः-ती एकसप्ततितमः-मी
७२. द्वासप्ततिः	
७३. त्रयःसप्ततिः	
७४. चतुःसप्ततिः	
७५. पञ्चसप्ततिः	
७६. षट्सप्ततिः	
७७. सप्तसप्ततिः	
७८. अष्टसप्ततिः	
७९. नवसप्ततिः	
८०. अशीतिः	अशीतितमः-मी
८१. एकाशीतिः	एकाशीतः-ती एकाशीतितमः-मी
८२. व्यशीतिः	
८३. त्र्यशीतिः	
८४. चतुरशीतिः	
८५. पञ्चाशीतिः	
८६. षडशीतिः	
८७. सप्ताशीतिः	
८८. अष्टाशीतिः	
८९. नवाशीतिः	
९०. नवतिः	नवतितमः-मी
९१. एकनवतिः	एकनवतः-ती एकनवतितमः-मी
९२. द्वानवतिः	
९३. त्रयोनवतिः	
९४. चतुर्नवतिः	
९५. पञ्चनवतिः	
९६. षण्णवतिः	
९७. सप्तनवतिः	
९८. अष्टनवतिः	
९९. नवनवतिः	
१००. शतम्	शततमः-मी
१,०००. सहस्रम्	
१०,०००. अयुतम्	
१००,०००. लक्षम्	
१०,००,०००. प्रयुतम्	
१,००,००,०००. कोटिः	

The ordinals from शत above are formed only by adding तम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अथ विशेषशब्दविभागः

अजन्तपुंलिङ्गप्रकरणम्

१४८. अकारान्तः पुंलिङ्गः 'निर्जर'* शब्दः

प्र.	निर्जरः	निर्जरौ निर्जरसौ	निर्जराः निर्जरसः
सं.प्र.	हे निर्जर	हे निर्जरौ हे निर्जरसौ	हे निर्जराः हे निर्जरसः
द्वि.	निर्जरम् निर्जरसम्	निर्जरौ निर्जरसौ	निर्जरान् निर्जरसः
तृ.	निर्जरेण निर्जरसा	निर्जराभ्यां	निर्जरैः
च.	निर्जराय निर्जरसे	निर्जराभ्यां	निर्जरेभ्यः
प.	निर्जरात् निर्जरसः	निर्जराभ्यां	निर्जरेभ्यः
ष.	निर्जरस्य निर्जरसः	निर्जरयोः निर्जरसोः	निर्जराणाम् निर्जरसाम्
स.	निर्जरे निर्जरसि	निर्जरयोः निर्जरसोः	निर्जरेषु

एवं अजर, विजरप्रभृतयः

*The word जरा optionally assumes the forms of जरस् before the vowel terminations.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

S. Savithri.
iii Form A.
N. G. H. School.

अकारान्तानां पाद, दन्त, मासशब्दानां पद्, दत्, मास् इत्यादेशा विकल्पेन भवन्ति । ते च यथाक्रमं 'सुहृद्' 'मरुत्' 'भास्' शब्दवत् द्रष्टव्याः ।

---

१४९. आकारान्तः पुंलिङ्गः 'विश्वपा' शब्दः

प्र.	विश्वपाः	विश्वपौ	विश्वपाः
सं.प्र.	हे विश्वपाः	हे विश्वपौ	हे विश्वपाः
द्वि.	विश्वपाम्	विश्वपौ	विश्वपः
तृ.	विश्वपा	विश्वपाभ्यां	विश्वपाभिः
च.	विश्वपे	विश्वपाभ्यां	विश्वपाभ्यः
प.	विश्वपः	विश्वपाभ्यां	विश्वपाभ्यः
ष.	विश्वपः	विश्वपोः	विश्वपाम्
स.	विश्वपि	विश्वपोः	विश्वपासु

एवं सोमपा, शङ्खध्माप्रभृतयः

---

१५०. आकारान्तः पुंलिङ्गः 'हाहा' शब्दः

प्र.	हाहाः	हाहौ	हाहाः
सं.प्र.	हे हाहाः	हे हाहौ	हे हाहाः
द्वि.	हाहाम्	हाहौ	हाहान्
तृ.	हाहा	हाहाभ्यां	हाहाभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

S Sabdamanjari

च.	हाहै	हाहाभ्यां	हाहाभ्यः
प.	हाहाः	हाहाभ्यां	हाहाभ्यः
ष.	हाहाः	हाहौः	हाहाम्
स.	हाहे	हाहौः	हाहासु

---

१५१. इकारान्तः पुंलिङ्गः 'औडुलोमि' शब्दः

प्र.	औडुलोमिः	औडुलोमी	उडुलोमाः
सं.प्र.	हे औडुलोमे	हे औडुलोमी	हे उडुलोमाः
द्वि.	औडुलोमिम्	औडुलोमी	उडुलोमान्

इत्यादि एकवचनद्विवचनयोः 'हरि' शब्दवत्, बहुवचने 'राम' शब्दवच्च रूपाणि ।

---

१५२. ईकारान्तः पुंलिङ्गः 'सुधी' शब्दः

प्र.	सुधीः	सुधियौ	सुधियः
सं.प्र.	हे सुधीः	हे सुधियौ	हे सुधियः
द्वि.	सुधियम्	सुधियौ	सुधियः
तृ.	सुधिया	सुधीभ्यां	सुधीभिः
च.	सुधिये	सुधीभ्यां	सुधीभ्यः
प.	सुधियः	सुधीभ्यां	सुधीभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ष.	सुधियः	सुधियोः	सुधियाम्
स.	सुधियि	सुधियोः	सुधीषु

एवं शुद्धधी, सुश्रीप्रभृतयः । केवलः 'नी' शब्दोऽप्येवम् । किन्तु तस्य सप्तम्येकवचने 'नियाम्' इति रूपम् ।

---

१५३. ईकारान्तः पुंलिङ्गः 'सेनानी' शब्दः

प्र.	सेनानीः	सेनान्यौ	सेनान्यः
सं.प्र.	हे सेनानीः	हे सेनान्यौ	हे सेनान्यः
द्वि.	सेनान्यम्	सेनान्यौ	सेनान्यः
तृ.	सेनान्या	सेनानीभ्यां	सेनानीभिः
च.	सेनान्ये	सेनानीभ्यां	सेनानीभ्यः
प.	सेनान्यः	सेनानीभ्यां	सेनानीभ्यः
ष.	सेनान्यः	सेनान्योः	सेनान्याम्
स.	सेनान्याम्	सेनान्योः	सेनानीषु

एवं ग्रामणीप्रभृतयः । प्रकृष्टं ध्यायतीति विग्रहे 'प्रधी' शब्दोऽप्येवमेव । किन्तु तस्य सप्तम्येकवचने 'प्रध्यि' इति रूपम् ।

---

१५४. प्रकृष्टा धीः यस्य इति विग्रहे तु

प्र.	प्रधीः	प्रध्यौ	प्रध्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे प्रधि	हे प्रध्यौ	हे प्रध्यः
द्वि.	प्रध्यम्	प्रध्यौ	प्रध्यः
तृ.	प्रध्या	प्रधीभ्यां	प्रधीभिः
च.	प्रध्यै	प्रधीभ्यां	प्रधीभ्यः
प.	प्रध्याः	प्रधीभ्यां	प्रधीभ्यः
ष.	प्रध्याः	प्रध्योः	प्रधीनाम्
स.	प्रध्याम्	प्रध्योः	प्रधीषु

वहुश्रेयसीशब्दोऽप्येवमेव । किन्तु तत्र प्रथमैकवचने 'वहु-श्रेयसी' इति विसर्गरहितं रूपम् ।

---

१५५. ईकारान्तः पुंलिङ्गः 'वातप्रमी' शब्दः

प्र.	वातप्रमीः	वातप्रम्यौ	वातप्रम्यः
सं.प्र.	हे वातप्रमीः	हे वातप्रम्यौ	हे वातप्रम्यः
द्वि.	वातप्रमीम्	वातप्रम्यौ	वातप्रमीन्
तृ.	वातप्रम्या	वातप्रमीभ्यां	वातप्रमीभिः
च.	वातप्रम्ये	वातप्रमीभ्यां	वातप्रमीभ्यः
प.	वातप्रम्यः	वातप्रमीभ्यां	वातप्रमीभ्यः
ष.	वातप्रम्यः	वातप्रम्योः	वातप्रम्याम्
स.	वातप्रमी	वातप्रम्योः	वातप्रमीषु

---

१५६. उकारान्तः पुंलिङ्गः 'क्रोष्टु' शब्दः

प्र.	क्रोष्टा	क्रोष्टारौ	क्रोष्टारः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे क्रोष्टो	हे क्रोष्टारौ	हे क्रोष्टारः
द्वि.	क्रोष्टारम्	क्रोष्टारौ	क्रोष्टून्
तृ.	क्रोष्ट्रा, क्रोष्टुना	क्रोष्टुभ्यां	क्रोष्टुभिः
च.	क्रोष्ट्रे, क्रोष्टवे	क्रोष्टुभ्यां	क्रोष्टुभ्यः
प	क्रोष्टुः, क्रोष्टोः	क्रोष्टुभ्यां	क्रोष्टुभ्यः
ष.	क्रोष्टुः, क्रोष्टोः	क्रोष्ट्रोः, क्रोष्ट्वोः	क्रोष्टूनाम्
स.	क्रोष्टरि, क्रोष्टौ	क्रोष्ट्रोः क्रोष्ट्वोः	क्रोष्टुषु

---

१५७. ऊकारान्तः पुंलिङ्गः 'वर्षाभू' शब्दः

प्र.	वर्षाभूः	वर्षाभ्वौ	वर्षाभ्वः
सं.प्र.	हे वर्षाभूः	हे वर्षाभ्वौ	हे वर्षाभ्वः
द्वि.	वर्षाभ्वम्	वर्षाभ्वौ	वर्षाभ्वः
तृ.	वर्षाभ्वा	वर्षाभूभ्यां	वर्षाभूभिः
च.	वर्षाभ्वे	वर्षाभूभ्यां	वर्षाभूभ्यः
प.	वर्षाभ्वः	वर्षाभूभ्यां	वर्षाभूभ्यः
ष.	वर्षाभ्वः	वर्षाभ्वोः	वर्षाभ्वाम्
स.	वर्षाभ्वि	वर्षाभ्वोः	वर्षाभूषु

एवं पुनर्भू, खलपूप्रभृतयः

---

१५८. ऊकारान्तः पुंलिङ्गः 'स्वभू' शब्दः

प्र.	स्वभूः	स्वभुवौ	स्वभुवः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

रा. २०४१

सं.प्र.	हे स्वभूः	हे स्वभुवौ	हे स्वभुवः
द्वि.	स्वभुवम्	स्वभुवौ	स्वभुवः
तृ.	स्वभुवा	स्वभूभ्यां	स्वभूभिः
च.	स्वभुवे	स्वभूभ्यां	स्वभूभ्यः
प.	स्वभुवः	स्वभूभ्यां	स्वभूभ्यः
ष.	स्वभुवः	स्वभुवोः	स्वभुवाम्
स.	स्वभुवि	स्वभुवोः	स्वभूषु

एवं स्वयम्भूप्रभृतयः

---

१५९. ऊकारान्तः पुंलिङ्गः 'हूहू' शब्दः

प्र.	हूहूः	हूह्वौ	हूह्वः
सं.प्र.	हे हूहूः	हे हूह्वौ	हे हूह्वः
द्वि.	हूहूम्	हूह्वौ	हूहून्
तृ.	हूह्वा	हूहूभ्यां	हूहूभिः
च.	हूह्वे	हूहूभ्यां	हूहूभ्यः
प.	हूह्वः	हूहूभ्यां	हूहूभ्यः
ष.	हूह्वः	हूह्वोः	हूह्वाम्
स.	हूह्वि	हूह्वोः	हूहूषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अजन्तस्त्रीलिङ्गप्रकरणम्

१६०. आकारान्तः स्त्रीलिङ्गः 'जरा' शब्दः

प्र.	जरा	जरे, जरसौ	जराः, जरसः
सं.प्र.	हे जरे	हे जरे, हे जरसौ	हे जराः, हे जरसः
द्वि.	जराम्, जरसम्	जरे, जरसौ	जराः, जरसः
तृ.	जरया, जरसा	जराभ्यां	जराभिः
च.	जरायै, जरसे	जराभ्यां	जराभ्यः
प.	जरायाः, जरसः	जराभ्यां	जराभ्यः
ष.	जरायाः, जरसः	जरयोः, जरसोः	जराणां, जरसाम्
स.	जरायां, जरसि	जरयोः, जरसोः	जरासु

अजन्तनपुंसकलिङ्गप्रकरणम्

१६१. अकारान्तनपुंसकलिङ्गः 'अजर' शब्दः

प्र.	अजरम्	अजरे, अजरसी	अजराणि, अजरांसि
सं.प्र.	हे अजर	हे अजरे, हे अजरसी	हे अजराणि, हे अजरांसि
द्वि.	अजरम्	अजरे, अजरसी	अजराणि, अजरांसि

शेषं 'निर्जर' शब्दवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दीर्घाणां ह्रस्वविधानात् नपुंसके आकारादिदीर्घान्ताः शब्दा न विद्यन्ते। तथा हि——आकारान्तः 'विश्वपा' शब्दः 'विश्वपम्' इति रूपं लभते। स च 'फल' शब्दवत्। एवं प्रधी-सुध्यादयः, 'प्रधि' 'सुधि' इत्येवं ह्रस्वान्ता भवन्ति॥

अथ हलन्तपुंलिङ्गप्रकरणम्

१६२. चकारान्तः पुंलिङ्गः 'प्राञ्च्' शब्दः

प्र.	*प्राङ्	प्राञ्चौ	प्राञ्चः
सं.प्र.	हे प्राङ्	हे प्राञ्चौ	हे प्राञ्चः
द्वि.	प्राञ्चम्	प्राञ्चौ	प्राचः
तृ.	प्राचा	प्राग्भ्यां	प्राग्भिः
च.	प्राचे	प्राग्भ्यां	प्राग्भ्यः
प.	प्राचः	प्राग्भ्यां	प्राग्भ्यः
ष.	प्राचः	प्राचोः	प्राचाम्
स.	प्राचि	प्राचोः	प्राक्षु

एवं पराञ्च्, अवाञ्च्प्रभृतयः

---

* प्राङादीनां रूपाणि स्त्रीलिङ्गे—प्राची, प्रतीची, उदीची, अनूची, तिरश्ची इति ईकारान्तानि भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१६३. चकारान्तः पुंलिङ्गः 'प्रत्यञ्च्' शब्दः

प्र.	प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः
सं.प्र.	हे प्रत्यङ्	हे प्रत्यञ्चौ	हे प्रत्यञ्चः
द्वि.	प्रत्यञ्चम्	प्रत्यञ्चौ	प्रतीचः
तृ.	प्रतीचा	प्रत्यग्भ्यां	प्रत्यग्भिः
च.	प्रतीचे	प्रत्यग्भ्यां	प्रत्यग्भ्यः
प.	प्रतीचः	प्रत्यग्भ्यां	प्रत्यग्भ्यः
ष.	प्रतीचः	प्रतीचोः	प्रतीचाम्
स.	प्रतीचि	प्रतीचोः	प्रत्यक्षु

एवं न्यञ्च्, सम्यञ्च्प्रभृतयः

---

१६४. चकारान्तः पुंलिङ्गः 'उदञ्च्' शब्दः

प्र.	उदङ्	उदञ्चौ	उदञ्चः
सं.प्र.	हे उदङ्	हे उदञ्चौ	उदञ्चः
द्वि.	उदञ्चम्	उदञ्चौ	उदीचः
तृ.	उदीचा	उदग्भ्यां	उदग्भिः

इत्यादि

---

१६५. चकारान्तः पुंलिङ्गः 'अन्वञ्च्' शब्दः

प्र.	अन्वङ्	अन्वञ्चौ	अन्वञ्चः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे अन्वङ्	हे अन्वञ्चौ	हे अन्वञ्चः
द्वि.	अन्वञ्चम्	अन्वञ्चौ	अनूचः
तृ.	अनूचा	अन्वग्भ्यां	अन्वग्भिः

इत्यादि

---

१६६. चकारान्तः पुंलिङ्गः 'तिर्यञ्च्' शब्दः

प्र.	तिर्यङ्	तिर्यञ्चौ	तिर्यञ्चः
सं.प्र.	हे तिर्यङ्	हे तिर्यञ्चौ	हे तिर्यञ्चः
द्वि.	तिर्यञ्चम्	तिर्यञ्चौ	तिरश्चः
तृ.	तिरश्चा	तिर्यग्भ्यां	तिर्यग्भिः
च.	तिरश्चे	तिर्यग्भ्यां	तिर्यग्भ्यः
प.	तिरश्चः	तिर्यग्भ्यां	तिर्यग्भ्यः
ष.	तिरश्चः	तिरश्चोः	तिरश्चाम्
स.	तिरश्चि	तिरश्चोः	तिर्यक्षु

---

१६७. जकारान्तः पुंलिङ्गः 'विभ्राज्' शब्दः

प्र.	विभ्राट्, विभ्राक्	विभ्राजौ	विभ्राजः
सं.प्र.	हे विभ्राट्, हे विभ्राक्	हे विभ्राजौ	हे विभ्राजः

शेषं 'राज्' शब्दवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१६८. जकारान्तः पुंलिङ्गः 'युज्'* शब्दः

प्र.	युक्	युजौ	युजः
सं.प्र.	हे युक्	हे युजौ	हे युजः
द्वि.	युजम्	युजौ	युजः
तृ.	युजा	युग्भ्यां	युग्भिः
च.	युजे	युग्भ्यां	युग्भ्यः
प.	युजः	युग्भ्यां	युग्भ्यः
ष.	युजः	युजोः	युजाम्
स.	युजि	युजोः	युक्षु

---

१६९. जकारान्तः पुंलिङ्गः 'युञ्ज्'** शब्दः

प्र.	युङ्	युञ्जौ	युञ्जः
सं.प्र.	हे युङ्	हे युञ्जौ	हे युञ्जः
द्वि.	युञ्जम्	युञ्जौ	युजः

शेषं 'युज्' शब्दवत्

---

१७०. जकारान्तः पुंलिङ्गः 'विश्वराज्' शब्दः

प्र.	विश्वाराट्	विश्वराजौ	विश्वराजः

*इदं 'युज समाधौ' इत्यस्मान्निष्पन्नं रूपम् ।

**इदं 'युजिर् योगे' इत्यस्मान्निष्पन्नं रूपम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे विश्वाराट्	हे विश्वराजौ	हे विश्वराजः
द्वि.	विश्वराजम्	विश्वराजौ	विश्वराजः
तृ.	विश्वराजा	विश्वाराड्भ्यां	विश्वाराड्भिः
च.	विश्वराजे	विश्वाराड्भ्यां	विश्वाराड्भ्यः
प.	विश्वराजः	विश्वाराड्भ्यां	विश्वाराड्भ्यः
ष.	विश्वराजः	विश्वराजोः	विश्वराजाम्
स.	विश्वराजि	विश्वराजोः	विश्वाराट्सु

१७१. दकारान्तः पुंलिङ्गः 'सुपाद्' शब्दः

प्र.	सुपात्	सुपादौ	सुपादः
सं.प्र.	हे सुपात्	हे सुपादौ	हे सुपादः
द्वि.	सुपादम्	सुपादौ	सुपदः
तृ.	सुपदा	सुपाद्भ्यां	सुपाद्भिः
च.	सुपदे	सुपाद्भ्यां	सुपाद्भ्यः
प.	सुपदः	सुपाद्भ्यां	सुपाद्भ्यः
ष.	सुपदः	सुपदोः	सुपदाम्
स.	सुपदि	सुपदोः	सुपात्सु

एवं द्विपाद्, व्याघ्रपाद्प्रभृतयः

१७२. नकारान्तः पुंलिङ्गः 'पूषन्' शब्दः

प्र.	पूषा	पूषणौ	पूषणः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे पूषन्	हे पूषणौ	हे पूषणः
द्वि.	पूषणम्	पूषणौ	पूष्णः

शेषं 'राजन्' शब्दवत् । एवं अर्यमन्प्रभृतयः ।

---

१७३. नकारान्तः पुंलिङ्गः 'वृत्रहन्' शब्दः

प्र.	वृत्रहा	वृत्रहणौ	वृत्रहणः
सं.प्र.	हे वृत्रहन्	हे वृत्रहणौ	हे वृत्रहणः
द्वि.	वृत्रहणम्	वृत्रहणौ	वृत्रघ्नः
तृ.	वृत्रघ्ना	वृत्रहभ्यां	वृत्रहभिः
च.	वृत्रघ्ने	वृत्रहभ्यां	वृत्रहभ्यः
प.	वृत्रघ्नः	वृत्रहभ्यां	वृत्रहभ्यः
ष.	वृत्रघ्नः	वृत्रघ्नोः	वृत्रघ्नाम्
स.	वृत्रघ्नि, वृत्रहणि	वृत्रघ्नोः	वृत्रहसु

एवं ब्रह्महन्प्रभृतयः

---

१७४. नकारान्तः पुंलिङ्गः 'दीर्घाहन्' शब्दः

प्र.	दीर्घाहाः	दीर्घाहाणौ	दीर्घाहाणः
सं.प्र.	हे दीर्घाहः	हे दीर्घाहाणौ	हे दीर्घाहाणः
द्वि.	दीर्घाहाणम्	दीर्घाहाणौ	दीर्घाह्णः
तृ.	दीर्घाह्णा	दीर्घाहोभ्यां	दीर्घाहोभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

च.	दीर्घाह्ने	दीर्घाहोभ्यां	दीर्घाहोभ्यः
प.	दीर्घाह्नः	दीर्घाहोभ्यां	दीर्घाहोभ्यः
ष.	दीर्घाह्नः	दीर्घाह्नोः	दीर्घाह्नाम्
स.	दीर्घाह्नि, दीर्घाहणि	दीर्घाह्नोः	दीर्घाहस्सु

---

१७५. नकारान्तः पुंलिङ्गः 'अर्वन्' शब्दः

प्र.	अर्वा	अर्वन्तौ	अर्वन्तः
सं.प्र.	हे अर्वन्	हे अर्वन्तौ	हे अर्वन्तः
द्वि.	अर्वन्तम्	अर्वन्तौ	अर्वतः

इत्यादि प्रथमैकवचनं विना सर्वं 'धीमत्' शब्दवत् । अनर्वन् शब्दस्तु 'आत्मन्' शब्दवत् ।

---

१७६. नकारान्तः पुंलिङ्गः 'ऋभुक्षिन्' शब्दः

प्र.	ऋभुक्षाः	ऋभुक्षाणौ	ऋभुक्षाणः
सं.प्र.	हे ऋभुक्षाः	हे ऋभुक्षाणौ	हे ऋभुक्षाणः
द्वि.	ऋभुक्षाणम्	ऋभुक्षाणौ	ऋभुक्षः
तृ.	ऋभुक्षा	ऋभुक्षिभ्यां	ऋभुक्षिभिः
च.	ऋभुक्षे	ऋभुक्षिभ्यां	ऋभुक्षिभ्यः
प.	ऋभुक्षः	ऋभुक्षिभ्यां	ऋभुक्षिभ्यः
ष.	ऋभुक्षः	ऋभुक्षोः	ऋभुक्षाम्
स.	ऋभुक्षि	ऋभुक्षोः	ऋभुक्षिषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१७७. सकारान्तः पुंलिङ्गः 'उशनस्' शब्दः

प्र.	उशना	उशनसौ	उशनसः
सं.प्र.	हे उशनन्, हे उशनः, हे उशन	हे उशनसौ	हे उशनसः

शेषं 'वेधस्' शब्दवत्

---

१७८. सकारान्तः पुंलिङ्गः 'अनेहस्' शब्दः

प्र.	अनेहा	अनेहसौ	अनेहसः

शेषं 'वेधस्' शब्दवत्

---

१७९. हकारान्तः पुंलिङ्गः 'विश्ववाह्' शब्दः

प्र.	*विश्ववाट्	विश्ववाहौ	विश्ववाहः
सं.प्र.	हे विश्ववाट्	हे विश्ववाहौ	हे विश्ववाहः

The final ह् of roots is generally changed to ट् or ड् when followed by consonantal terminations and in the Nominative Singular ; See लिह्, विश्ववाह्, तुरासाह् etc. In the case of roots beginning with द् it is changed to क् or ग् under the same circumstances. The ह् of द्रुह्, मुह्, स्नुह् and स्निह् is optionally changed either to क् or ग् or to ट् or ड्। In the case of उपानह्, ह् is changed to त् or द्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वि.	विश्ववाहम्	विश्ववाहौ	विश्वौहः
तृ.	विश्वौहा	विश्ववाड्भ्यां	विश्ववाड्भिः
च.	विश्वौहे	विश्ववाड्भ्यां	विश्ववाड्भ्यः
प.	विश्वौहः	विश्ववाड्भ्यां	विश्ववाड्भ्यः
ष.	विश्वौहः	विश्वौहोः	विश्वौहाम्
स.	विश्वौहि	विश्वौहोः	विश्ववाट्सु

एवं हव्यवाह्, भारवाह्प्रभृतयः

---

१८०. हकारान्तः पुंलिङ्गः 'तुरासाह्' शब्दः

प्र.	तुराषाट्	तुरासाहौ	तुरासाहः
सं.प्र.	हे तुराषाट्	हे तुरासाहौ	हे तुरासाहः
द्वि.	तुरासाहम्	तुरासाहौ	तुरासाहः
तृ.	तुरासाहा	तुराषाड्भ्यां	तुराषाड्भिः
च.	तुरासाहे	तुराषाड्भ्यां	तुराषाड्भ्यः
प.	तुरासाहः	तुराषाड्भ्यां	तुराषाड्भ्यः
ष.	तुरासाहः	तुरासाहोः	तुरासाहाम्
स.	तुरासाहि	तुरासाहोः	तुराषाट्सु

---

१८१. हकारान्तः पुंलिङ्गः 'दुह्' शब्दः

प्र.	धुक्	दुहौ	दुहः
सं.प्र.	हे धुक्	हे दुहौ	हे दुहः
द्वि.	दुहम्	दुहौ	दुहः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृ.	दुहा	धुग्भ्यां	धुग्भिः
च.	दुहे	धुग्भ्यां	धुग्भ्यः
प.	दुहः	धुग्भ्यां	धुग्भ्यः
ष.	दुहः	दुहोः	दुहाम्
स.	दुहि	दुहोः	धुक्षु

एवं दह्, दिह्प्रभृतयः

---

१८२. हकारान्तः पुंलिङ्गः 'द्रुह्' शब्दः

प्र.	ध्रुक्, ध्रुट्	द्रुहौ	द्रुहः
सं प्र.	हे ध्रुक्, हे ध्रुट्	हे द्रुहौ	हे द्रुहः
द्वि.	द्रुहम्	द्रुहौ	द्रुहः
तृ.	द्रुहा	ध्रुग्भ्यां, ध्रुड्भ्यां	ध्रुग्भिः, ध्रुड्भिः
च.	द्रुहे	ध्रुग्भ्यां, ध्रुड्भ्यां	ध्रुग्भ्यः, ध्रुड्भ्यः
प.	द्रुहः	ध्रुग्भ्यां ध्रुड्भ्यां	ध्रुग्भ्यः, ध्रुड्भ्यः
ष.	द्रुहः	द्रुहोः	द्रुहाम्
स.	द्रुहि	द्रुहोः	ध्रुक्षु, ध्रुट्सु

एवं मुह्, स्नुह्, स्निह्शब्दाः

---

१८३. हकारान्तः पुंलिङ्गः 'अनडुह्' शब्दः

प्र.	अनड्वान्	अनड्वाहौ	अनड्वाहः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सं.प्र.	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः
द्वि.	अनड्वाहम्	अनड्वाहौ	अनडुहः
तृ.	अनडुहा	अनडुद्भ्यां	अनडुद्भिः
च.	अनडुहे	अनडुद्भ्यां	अनडुद्भ्यः
प.	अनडुहः	अनडुद्भ्यां	अनडुद्भ्यः
ष.	अनडुहः	अनडुहोः	अनडुहाम्
स.	अनडुहि	अनडुहोः	अनडुत्सु

हलन्तस्त्रीलिङ्गप्रकरणम्

१८४. रेफान्तः स्त्रीलिङ्गः 'द्वार्' शब्दः

प्र.	द्वाः	द्वारौ	द्वारः
सं.प्र.	हे द्वाः	हे द्वारौ	हे द्वारः
द्वि.	द्वारम्	द्वारौ	द्वारः
तृ.	द्वारा	द्वार्भ्यां	द्वार्भिः
च.	द्वारे	द्वार्भ्यां	द्वार्भ्यः
प.	द्वारः	द्वार्भ्यां	द्वार्भ्यः
ष.	द्वारः	द्वारोः	द्वाराम्
स.	द्वारि	द्वारोः	द्वार्षु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१८५. सकारान्तः स्त्रीलिङ्गः 'अर्चिस्' शब्दः

प्र.	अर्चिः	अर्चिषौ	अर्चिषः
सं.प्र.	हे अर्चिः	हे अर्चिषौ	हे अर्चिषः
द्वि.	अर्चिषम्	अर्चिषौ	अर्चिषः
तृ.	अर्चिषा	अर्चिर्भ्यां	अर्चिर्भिः
च.	अर्चिषे	अर्चिर्भ्यां	अर्चिर्भ्यः
प.	अर्चिषः	अर्चिर्भ्यां	अर्चिर्भ्यः
ष.	अर्चिषः	अर्चिषोः	अर्चिषाम्
स.	अर्चिषि	अर्चिषोः	अर्चिःषु

---

१८६. षकारान्तः स्त्रीलिङ्गः 'सजुष्' शब्दः

प्र.	सजूः	सजुषौ	सजुषः
सं.प्र.	हे सजूः	हे सजुषौ	हे सजुषः
द्वि.	सजुषम्	सजुषौ	सजुषः
तृ.	सजुषा	सजूर्भ्यां	सजूर्भिः
च.	सजुषे	सजूर्भ्यां	सजूर्भ्यः
प.	सजुषः	सजूर्भ्यां	सजूर्भ्यः
ष.	सजुषः	सजुषोः	सजुषाम्
स.	सजुषि	सजुषोः	सजूःषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१८७. हकारान्तः स्त्रीलिङ्गः 'उष्णिह्' शब्दः

प्र.	*उष्णिक्	उष्णिहौ	उष्णिहः
सं.प्र.	हे उष्णिक्	हे उष्णिहौ	हे उष्णिहः
द्वि.	उष्णिहम्	उष्णिहौ	उष्णिहः
तृ.	उष्णिहा	उष्णिग्भ्यां	उष्णिग्भिः
च.	उष्णिहे	उष्णिग्भ्यां	उष्णिग्भ्यः
पं.	उष्णिहः	उष्णिग्भ्यां	उष्णिग्भ्यः
ष.	उष्णिहः	उष्णिहोः	उष्णिहाम्
स.	उष्णिहि	उष्णिहोः	उष्णिक्षु

हलन्तनपुंसकलिङ्गप्रकरणम्

---

१८८. चकारान्तनपुंसकलिङ्गः 'प्राञ्च्' शब्दः

प्र., सं.प्र., द्वि. प्राक् प्राची प्राञ्चि

शेषं पुंवत्

एवम्—

१८९. प्र., सं.प्र., द्वि. प्रत्यक् प्रतीची प्रत्यञ्चि

१९०. प्र., सं.प्र., द्वि. अन्वक् अनूची अन्वञ्चि

* The ह् of उष्णिह् is changed to क् or ग्.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

१९१. प्र.,	सं.प्र.,	द्वि.	उदक्	उदीची	उदञ्चि
१९२. प्र.,	सं.प्र.,	द्वि.	तिर्यक्	तिरश्ची	तिर्यञ्चि

इत्यादीनि प्रथमा–सम्बोधन–द्वितीयासु । शेषं पुंवत् ।

पूजार्थकस्य अञ्चुधातोस्तु—

प्र.,	सं.प्र.,	द्वि.	प्राङ्	प्राञ्ची	प्राञ्चि
प्र.,	सं.प्र.,	द्वि.	प्रत्यङ्	प्रत्यञ्ची	प्रत्यञ्चि
प्र.,	सं.प्र.,	द्वि.	अन्वङ्	अन्वञ्ची	अन्वञ्चि
प्र.,	सं.प्र.,	द्वि.	उदङ्	उदञ्ची	उदञ्चि
प्र.,	सं.प्र.,	द्वि.	तिर्यङ्	तिर्यञ्ची	तिर्यञ्चि

इति विशेषः

---

१९३. हकारान्तनपुंसकलिङ्गः 'दुह्' शब्दः

प्र.,	सं.प्र.,	द्वि.	धुक्	दुही	दुंहि

एवम्—

१९४. प्र.,	सं.प्र.,	द्वि.	ध्रुक्, ध्रुट्	द्रुही	द्रुंहि

---

१९५. प्र.,	सं.प्र.,	द्वि.	स्वनडुत्	स्वनडुही	स्वनड्वांहि

शेषं पुंवत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तिङन्तप्रकरणम्

संस्कृतभाषायामेकैकस्यापि धातोः दश लकाराः सम्भवन्ति। तेषु षट् लकाराः कालवाचकाः, इतरे प्रकारबोधकाः। यथा—

कालवाचकाः Tenses	लट्	Present	=भवति
	लङ्	Imperfect	=अभवत्
	लुङ्	Aorist	=अभूत्
	लिट्	Perfect	=बभूव
	लुट्	First Future	=भविता
	लृट्	Second Future	=भविष्यति
प्रकारबोधकाः Moods	लोट्	Imperative	=भवतु
	विधिलिङ्	Potential	=भवेत्
	आशीर्लिङ्	Benedictive	=भूयात्
	लृङ्	Conditional	=अभविष्यत्

एतेषामेकैकस्यापि लकारस्य स्थाने पृथक् पुरुषप्रत्यया भवन्ति। पुरुषाश्च त्रयः सन्ति—प्रथमपुरुषः, मध्यमपुरुषः, उत्तमपुरुषः—इति। पुरुषाणां प्रत्येकं त्रीणि वचनानि विद्यन्ते—एकवचनम्, द्विवचनम्, बहुवचनम्—इति॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उक्ता दश लकाराः *सार्वधातुक——**आर्धधातुकभेदेन द्वेधा विभक्ताः । लट्, लङ्, लोट्, लिङ् इत्येते चत्वारः सार्वधातुकाः ; अन्ये षट् आर्धधातुकाः । तत्र सार्वधातुकेषु लकारेषु धातूनां पुरुषप्रत्ययानां च मध्ये विकरणाख्याः प्रत्ययाः संयोज्यन्ते । तथा हि——भवतीत्यादौ अंशत्रयमस्ति भू+अ+ति । 'भू' इति धातुः, 'अ' इति विकरणप्रत्ययः 'ति' इति पुरुषप्रत्ययः ॥

इमं विकरणभेदमनुसृत्य धातवो दशसु गणेषु विभज्य पठिताः । तथा हि—

गणः	धातुः	विकरणप्रत्ययः	परस्मै	आत्मने	प्रथमपुरुषैकवचने रूपाणि
प्रथमगणः भ्वादिः	भू	अ	ति	ते	भवति (वन्दते)
×द्वितीयगणः अदादिः	अद्	—	ति	ते	अत्ति, (आस्ते)

* Conjugational tenses and moods.

** Non-Conjugational tenses and moods.

× In the 2nd Conjugation terminations are directly added to roots.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गणः	धातुः	विकरण-प्रत्ययः	परस्मै	आत्मने	प्रथमपुरुषैक-वचने रूपाणि
*तृतीयगणः जुहोत्यादिः	हु	—	ति	ते	जुहोति, जुहुते
चतुर्थगणः दिवादिः	दिव्	य	ति	ते	दीव्यति, दीव्यते
पञ्चमगणः स्वादिः	सु	नु	ति	ते	सुनोति, सुनुते
षष्ठगणः तुदादिः	तुद्	अ	ति	ते	तुदति, तुदते
सप्तमगणः रुधादिः	रुध्	न	ति	ते	रुणद्धि, रुन्धे
अष्टमगणः तनादिः	तन्	उ	ति	ते	तनोति, तनुते
नवमगणः क्र्यादिः	क्री	ना	ति	ते	क्रीणाति, क्रीणीते
दशमगणः चुरादिः	चुर्	अय	ति	ते	चोरयति, चोरयते

* In this Conjugation the roots undergo reduplication before the Personal Terminations are applied.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उपर्युक्तेषु क्रियापदानां रूपेषु भेदा विकरणप्रत्ययैः सम्पन्ना इति व्यक्तमेव ज्ञायते। पुरुषप्रत्ययास्तु सर्वत्र समाना एव॥

पुरुषप्रत्ययानां परस्मैपदम् आत्मनेपदमिति द्वौ भेदौ स्तः। केभ्यश्चन धातुभ्यः परस्मैपदमेव भवति। केभ्यश्चनात्मनेपदमेव। अपरेभ्यः केभ्यश्चन उभयमपि पदं सम्भवति॥

आर्धधातुकेषु लकारेषु विकरणनिमित्तको रूपभेदो नास्ति। किन्तु केचन धातवोऽनिटः केचन सेटश्चेत्ययं भेदोऽस्ति। यथा—भू धातुः सेट्, अतः भविता, भविष्यतीत्यादौ धातोः पुरुष-प्रत्ययस्य च मध्ये 'इ' इत्येतत् श्रूयते। त्यज् धातुः अनिट्, अतः त्यक्ता, त्यक्ष्यतीत्यादौ 'इ' इत्येतन्नास्ति। विशेषोऽत्र धातु-मञ्जरीतोऽधिगन्तव्यः॥

दिक्प्रदर्शनाय अस्मिन् प्रकरणे त्रिचतुराणां धातूनां रूपाणि निर्दिश्यन्ते॥

प्रथमगणस्थः

सत्तार्थकः 'भू' धातुः—परस्मैपदी

लट् (वर्तमानार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	भवति	भवतः	भवन्ति
मध्यमपुरुषः	भवसि	भवथः	भवथ
उत्तमपुरुषः	भवामि	भवावः	भवामः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लङ् (अनद्यतनभूतार्थकः)

प्र.	अभवत्	अभवतां	अभवन्
म.	अभवः	अभवतं	अभवत
उ.	अभवं	अभवाव	अभवाम

लोट् (विध्याशीःप्रार्थनार्थकः)

प्र.	भवतु, भवतात्	भवतां	भवन्तु
म.	भव, भवतात्	भवतं	भवत
उ.	भवानि	भवाव	भवाम

विधिलिङ् (विधिप्रार्थनाद्यर्थकः)

प्र.	भवेत्	भवेतां	भवेयुः
म.	भवेः	भवेतं	भवेत
उ.	भवेयं	भवेव	भवेम

लुट् (अनद्यतनभविष्यदर्थकः)

प्र.	भविता	भवितारौ	भवितारः
म.	भवितासि	भवितास्थः	भवितास्थ
उ.	भवितास्मि	भवितास्वः	भवितास्मः

लृट् (भविष्यदर्थकः)

प्र.	भविष्यति	भविष्यतः	भविष्यन्ति
म.	भविष्यसि	भविष्यथः	भविष्यथ
उ.	भविष्यामि	भविष्यावः	भविष्यामः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लृङ् (भूते भाविनि च क्रियाया अनिष्पत्तावर्थे)

प्र.	अभविष्यत्	अभविष्यतां	अभविष्यन्
म.	अभविष्यः	अभविष्यतं	अभविष्यत
उ.	अभविष्यं	अभविष्याव	अभविष्याम

लिट् (भूतानद्यतनपरोक्षक्रियार्थकः)

प्र.	बभूव	बभूवतुः	बभूवुः
म.	बभूविथ	बभूवथुः	बभूव
उ.	बभूव	बभूविव	बभूविम

लुङ् (भूतार्थकः)

प्र.	अभूत्	अभूतां	अभूवन्
म.	अभूः	अभूतं	अभूत
उ.	अभूवं	अभूव	अभूम

आशीर्लिङ् (आशीरर्थकः)

प्र.	भूयात्	भूयास्तां	भूयासुः
म.	भूयाः	भूयास्तं	भूयास्त
उ.	भूयासं	भूयास्व	भूयास्म

'वन्द्' अभिवादने—आत्मनेपदी

लट्

प्र.	वन्दते	वन्देते	वन्दन्ते
म.	वन्दसे	वन्देथे	वन्दध्वे
उ.	वन्दे	वन्दावहे	वन्दामहे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लङ्

प्र.	अवन्दत	अवन्देतां	अवन्दन्त
म.	अवन्दथाः	अवन्देथां	अवन्दध्वं
उ.	अवन्दे	अवन्दावहि	अवन्दामहि

लोट्

प्र.	वन्दतां	वन्देन्तां	वन्दन्तां
म.	वन्दस्व	वन्देथां	वन्दध्वं
उ.	वन्दै	वन्दावहै	वन्दामहै

विधिलिङ्

प्र.	वन्देत	वन्देयातां	वन्देरन्
म.	वन्देथाः	वन्देयाथां	वन्देध्वं
उ.	वन्देय	वन्देवहि	वन्देमहि

लुट्

प्र.	वन्दिता	वन्दितारौ	वन्दितारः
म.	वन्दितासे	वन्दितासाथे	वन्दिताध्वे
उ.	वन्दिताहे	वन्दितास्वहे	वन्दितास्महे

लृट्

प्र.	वन्दिष्यते	वन्दिष्येते	वन्दिष्यन्ते
म.	वन्दिष्यसे	वन्दिष्येथे	वन्दिष्यध्वे
उ.	वन्दिष्ये	वन्दिष्यावहे	वन्दिष्यामहे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लृङ्

प्र.	अवन्दिष्यत	अवन्दिष्येतां	अवन्दिष्यन्त
म.	अवन्दिष्यथाः	अवन्दिष्येथां	अवन्दिष्यध्वं
उ.	अवन्दिष्ये	अवन्दिष्यावहि	अवन्दिष्यामहि

लिट्

प्र.	ववन्दे	ववन्दाते	ववन्दिरे
म.	ववन्दिषे	ववन्दाथे	ववन्दिध्वे
उ.	ववन्दे	ववन्दिवहे	ववन्दिमहे

लुङ्

प्र.	अवन्दिष्ट	अवन्दिषातां	अवन्दिषत
म.	अवन्दिष्ठाः	अवन्दिषाथां	अवन्दिध्वं
उ.	अवन्दिषि	अवन्दिष्वहि	अवन्दिष्महि

आशीर्लिङ्

प्र.	वन्दिषीष्ट	वन्दिषीयास्तां	वन्दिषीरन्
म.	वन्दिषीष्ठाः	वन्दिषीयास्तां	वन्दिषीध्वं
उ.	वन्दिषीय	वन्दिषीवहि	वन्दिषीमहि

द्वितीयगणस्थः

भवार्थकः 'अस्' धातुः—परस्मैपदी

लट्

प्र.	अस्ति	स्तः	सन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

म.	असि	स्थः	स्थ
उ.	अस्मि	स्वः	स्मः

लङ्

प्र.	आसीत्	आस्तां	आसन्
म.	आसीः	आस्तं	आस्त
उ.	आसं	आस्व	आस्म

लोट्

प्र.	अस्तु, स्तात्	स्तां	सन्तु
म.	एधि, स्यात्	स्तं	स्त
उ.	असानि	असाव	असाम

विधिलिङ्

प्र.	स्यात्	स्यातां	स्युः
म.	स्याः	स्यातं	स्यात
उ.	स्यां	स्याव	स्याम

'अस्' धातोः इतरेषु लकारेषु भूधातोरेव रूपाणि द्रष्टव्यानि ।

अष्टमगणस्थः

करणार्थकः 'कृ' धातुः–उभयपदी–परस्मैपदरूपाणि

लट्

प्र.	करोति	कुरुतः	कुर्वन्ति
म.	करोषि	कुरुथः	कुरुथ
उ.	करोमि	कुर्वः	कुर्मः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लङ्

प्र.	अकरोत्	अकुरुतां	अकुर्वन्
म.	अकारोः	अकुरुतं	अकुरुत
उ.	अकरवं	अकुर्व	अकुर्म

लोट्

प्र.	करोतु, कुरुतात्	कुरुतां	कुर्वन्तु
म.	कुरु, कुरुतात्	कुरुतं	कुरुत
उ.	करवाणि	करवाव	करवाम

विधिलिङ्

प्र.	कुर्यात्	कुर्यातां	कुर्युः
म.	कुर्याः	कुर्यातं	कुर्यात
उ.	कुर्याम्	कुर्याव	कुर्याम

लुट्

प्र.	कर्ता	कर्तारौ	कर्तारः
म	कर्तासि	कर्तास्थः	कर्तास्थ
उ.	कर्तास्मि	कर्तास्वः	कर्तास्मः

लृट्

प्र.	करिष्यति	करिष्यतः	करिष्यन्ति
म.	करिष्यसि	करिष्यथः	करिष्यथ
उ.	करिष्यामि	करिष्यावः	करिष्यामः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लृङ्

प्र.	अकरिष्यत्	अकरिष्यतां	अकरिष्यन्
म.	अकरिष्यः	अकरिष्यतं	अकरिष्यत
उ.	अकरिष्यं	अकरिष्याव	अकरिष्याम

लिट्

प्र.	चकार	चक्रतुः	चक्रुः
म.	चकर्थ	चक्रथुः	चक्र
उ.	चकार, चकर	चकृव	चकृम

लुङ्

प्र.	अकार्षीत्	अकार्ष्टां	अकार्षुः
म.	अकार्षीः	अकार्ष्टं	अकार्ष्ट
उ.	अकार्षम्	अकार्ष्व	अकार्ष्म

आशीर्लिङ्

प्र.	क्रियात्	क्रियास्तां	क्रियासुः
म.	क्रियाः	क्रियास्तं	क्रियास्त
उ.	क्रियासं	क्रियास्व	क्रियास्म

आत्मनेपदरूपाणि

लट्

प्र.	कुरुते	कुर्वाते	कुर्वते
म.	कुरुषे	कुर्वाथे	कुरुध्वे
उ.	कुर्वे	कुर्वहे	कुर्महे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लङ्

प्र.	अकुरुत	अकुर्वातां	अकुर्वत
म.	अकुरुथाः	अकुर्वाथां	अकुरुध्वं
उ.	अकुर्वि	अकुर्वहि	अकुर्महि

लोट्

प्र.	कुरुतां	कुर्वातां	कुर्वतां
म.	कुरुष्व	कुर्वाथां	कुरुध्वं
उ.	करवै	करवावहै	करवामहै

विधिलिङ्

प्र.	कुर्वीत	कुर्वीयातां	कुर्वीरन्
म.	कुर्वीथाः	कुर्वीयाथां	कुर्वीध्वं
उ.	कुर्वीय	कुर्वीवहि	कुर्वीमहि

लुट्

प्र.	कर्ता	कर्तारौ	कर्तारः
म.	कर्तासे	कर्तासाथे	कर्ताध्वे
उ.	कर्ताहे	कर्तास्वहे	कर्तास्महे

लृट्

प्र.	करिष्यते	करिष्येते	करिष्यन्ते
म.	करिष्यसे	करिष्येथे	करिष्यध्वे
उ.	करिष्ये	करिष्यावहे	करिष्यामाहे

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

लृङ्

प्र.	अकरिष्यत	अकरिष्येतां	अकरिष्यन्त
म.	अकरिष्यथाः	अकरिष्येथां	अकरिष्यध्वं
उ.	अकरिष्ये	अकरिष्यावहि	अकरिष्यामहि

लिट्

प्र.	चक्रे	चक्राते	चक्रिरे
म.	चकृषे	चक्राथे	चकृढ्वे
उ.	चक्रे	चकृवहे	चकृमहे

लुङ्

प्र.	अकृत	अकृषातां	अकृषत
म.	अकृथाः	अकृषाथां	अकृढ्वं
उ.	अकृषि	अकृष्वहि	अकृष्महि

आशीर्लिङ्

प्र.	कृषीष्ट	कृषीयास्तां	कृषीरन्
म.	कृषीष्ठाः	कृषीयास्थां	कृषीढ्वं
उ.	कृषीय	कृषीवहि	कृषीमहि

प्रयोगनिरूपणम्

प्रयोगस्त्रिविधः—कर्तरि प्रयोगः, कर्मणि प्रयोगः, भावे प्रयोगः—इति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्तरि प्रयोगोऽपि त्रिविधः—अकर्मकः, सकर्मः, द्विकर्मकः—इति । यथा—

अकर्मकः—पुष्पं विकसति, सूर्यः प्रकाशते—इत्यादि । सकर्मकः—गोपालः गां रक्षति, सुतः पितरं वन्दते—इत्यादि ।

*द्विकर्मकः—शिष्यः गुरुं संशयं पृच्छति, गुरुः शिष्यं तत्त्वं ब्रूते—इत्यादि ।

कर्तरि प्रयोगे कर्तृवाचकात् पदात् प्रथमा, कर्मवाचकात् द्वितीया च विभक्तिर्भवति । यथा—गोपालः गां रक्षति—इत्यत्र गोपालः कर्ता, गौश्च कर्मेति द्रष्टव्यम् ।

भावकर्मप्रयोगः

सकर्मकेभ्यो धातुभ्यः कर्मणि, अकर्मकेभ्यो धातुभ्यो भावे च लकाराः भवन्ति । भावे कर्मणि च धातूनामात्मनेपदमेव भवति; न तु परस्मैपदम् । भावकर्मणोः लटि लङि लोटि लिङि च धातूनां प्रत्ययानां च मध्ये 'य' इत्येतदक्षरं संयोज्यते यथा—वन्द्+य+ते='वन्द्यते' इत्येतत् कर्मणि रूपम् । एवं भू+य+ते ='भूयते' इत्येतत् भावे रूपम् ।

कर्मणि प्रयोगे कर्तृवाचकात् पदात् तृतीया, कर्मवाचकात् प्रथमा च विभक्तिः । यथा—

---

*द्विकर्मका धातवः—

दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कर्तरि प्रयोगः	कर्मणि प्रयोगः
गोपालः गां रक्षति	गोपालेन गौः रक्ष्यते
सुतः पितरं वन्दते	सुतेन पिता वन्द्यते
अहं त्वां पाठयामि	त्वं मया पाठ्यसे
त्वं मां नमसि	त्वया अहं नम्ये

द्विकर्मके कर्मणि प्रयोगे तु प्रायेण *अप्रधानकर्मवाचकात् पदात् प्रथमा विभक्तिर्भवति । प्रधानकर्मवाचकात्तु द्वितीयैव । यथा—

शिष्यः गुरुं संशयं पृच्छति	शिष्येण गुरुः संशयं पृच्छ्यते
गुरुः शिष्यं तत्त्वं ब्रूते	गुरुणा शिष्यः तत्त्वं उच्यते

भावे प्रयोगे तु कर्म न सम्भवति । कर्तृवाचकात् पदात् कर्मणि प्रयोग इव अत्रापि तृतीया विभक्तिः । यथा—

पुष्पं विकसति	पुष्पेण विकस्यते
त्वं वर्धसे	त्वया वर्ध्यते
अहमस्मिन् गृहे वसामि	मया अस्मिन् गृहे उष्यते

प्रधानभूतानां केषाञ्चित् धातूनां कर्तरि कर्मणि भावे च रूपाणि उदाह्रियन्ते—

* अत्रेयं व्यवस्था—गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।—प्रथमा भवतीति शेषः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

धातुः	कर्तरि	कर्मणिभावेन	धातुः	कर्तरि	कर्मणिभावेन
अच्	अर्चति	अर्च्यते	छिद्	छिनत्ति	छिद्यते
अस्	अस्ति	भूयते	जि	जयति	जीयते
आप्	आप्नोति	आप्यते	त्यज्	त्यजति	त्यज्यते
इष्	इच्छति	इष्यते	दा	यच्छति	दीयते
ईक्ष्	ईक्षते	ईक्ष्यते	पा	पिबति	पीयते
ऊह्	ऊहते	ऊह्यते	बन्ध्	बध्नाति	बध्यते
कथ्	कथयति	कथ्यते	यज्	यजति	इज्यते
कृ	करोति	क्रियते	वह्	वहति	उह्यते
क्षम्	क्षमते	क्षम्यते	स्तु	स्तौति	स्तूयते
क्षिप्	क्षिपति	क्षिप्यते	स्मृ	स्मरति	स्मर्यते
गी	गायति	गीयते	हन्	हन्ति	हन्यते
ग्रह्	गृह्णाति	गृह्यते	शास्	शास्ति	शिष्यते

वृत्तयः

द्वाभ्यां बहुभिर्वा पदैः बोधनीयोऽर्थः संस्कृतभाषायां कदाचित् एकेन पदेन बोधयितुं शक्यते । यथा 'वसुदेवस्य अपत्यं पुमान्' इत्ययमर्थः 'वासुदेवः' इत्येकेन पदेन बोध्यते । अस्य लघुमार्गस्य 'वृत्तिः' इति संज्ञा । वृत्तयः पञ्च—कृद्वृत्तिः, तद्धितवृत्तिः, समासवृत्तिः, एकशेषवृत्तिः, सनाद्यन्तधातुवृत्तिः—इति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृद्वृत्तिः

कृत्प्रत्ययाः धातुभ्यो विधीयन्ते । प्रायेण नामशब्दाः सर्वे धातुषु कृत्प्रत्ययानां योजनेन निष्पन्नाः । यथा—रमन्तेऽस्मिन् इति रामः, अयं 'रम्' धातौ 'अ' इति प्रत्ययस्य योजनेन निष्पन्नः । एवमन्येऽपि नामशब्दा द्रष्टव्याः । गच्छन् पश्यन् इत्यादयः शत्रन्ताः, गतः दृष्टः इत्यादयः क्तान्ताः, गतवान् दृष्टवान् इत्यादयः क्तवत्वन्ताः, गत्वा दृष्ट्वा इत्यादयः क्त्वान्ताः, आगत्य सन्दृश्य इत्यादयः ल्यबन्ताश्च सर्वे कृदन्ता एव ॥

तद्धितवृत्तिः

यथा कृत्प्रत्यया धातुभ्यो विधीयन्ते तथा तद्धितप्रत्ययाः नामभ्यो विधीयन्ते । यथा—दशरथस्य अपत्यं पुमान् = 'दाशरथिः' इत्यत्र दशरथशब्दे 'इ'प्रत्ययो योजितः । एवम्, बुद्धिः अस्यास्तीति = बुद्धिमान्, मम इदम् = मामकम्, अस्तीति मतिरस्य = आस्तिकः, नास्तीति मतिरस्य = नास्तिकः, जनानां समूहो = जनता इत्यादयः सर्वे तद्धितान्ता एव ॥

समासवृत्तिः

समासः सविस्तरमत्र निरूप्यते । अन्वितानां पदानामेकीकरणं समासः । द्वयोः बहूनां वा पदानां समासः सम्भवति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अलुक्समासादन्यत्र समासे सर्वत्र पूर्वपदानां विभक्तयो लुप्यन्ते। यथा—सीतायाः पतिः इति पदद्वयं 'सीतापतिः' इति समासे नैकीकृतम्। अत्र सीतायाः इति पूर्वपदस्य विभक्तिः लुप्ता। एवमन्यत्रापि द्रष्टव्यम्॥

समासः प्राधान्येन चतुर्विधः—तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः, अव्ययीभावः—इति। द्विगुकर्मधारयौ कैश्चित् पृथक्त्वेन परिगणितौ। किन्तु तौ तत्पुरुषस्यैव भेदौ। अतः समासश्चतुर्विध इत्येव साधीयः। एषां समासानामर्थविशेषाः—

(१) उत्तरपदार्थप्रधानस्तत्पुरुषः—राजपुत्रः।
(२) अन्यपदार्थप्रधानो बहुव्रीहिः—पीताम्बरः।
(३) उभयपदार्थप्रधानो द्वन्द्वः—रामलक्ष्मणौ।
(४) पूर्वपदार्थप्रधानोऽव्ययीभावः—उपनगरम्।

तत्पुरुषसमासः

तत्पुरुषसमासः पूर्वपदस्य विभक्तिमनुसृत्य सप्तविधः सम्भवति। यथा—

(१) प्रथमातत्पुरुषः—उत्तरः कायस्य = उत्तरकायः। पूर्वः कायस्य = पूर्वकायः। अर्धं रात्रेः = अर्धरात्रम्।

(२) द्वितीयातत्पुरुषः—दुःखम् अतीतः = दुःखातीतः। कृष्णं श्रितः = कृष्णाश्रितः। ग्रामं गतः = ग्रामगतः। अश्वम् आरूढः = अश्वारूढः। अन्नं बुभुक्षुः = अन्नबुभुक्षुः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(३) तृतीयातत्पुरुषः—नखैः भिन्नः=नखभिन्नः। मासेन पूर्वः=मासपूर्वः । मासेन अवरः=मासावरः । वाचा कलहः=वाक्कलहः । पित्रा तुल्यः=पितृतुल्यः ।

(४) चतुर्थीतत्पुरुषः—भूतेभ्यो बलिः=भूतबलिः । यूपाय दारु=यूपदारु । कुण्डलाय हिरण्यम्=कुण्डलहिरण्यम् । गुरवे दक्षिणा=गुरुदक्षिणा । गवे हितम्=गोहितम् ।

(५) पञ्चमीतत्पुरुषः—चोरात् भयम्=चोरभयम् । व्याघ्रात् भीतः=व्याघ्रभीतः । दुःखात् अपेतः=दुःखापेतः । बन्धात् मुक्तः=बन्धमुक्तः ।

(६) षष्ठीतत्पुरुषः—राज्ञः पुत्रः=राजपुत्रः । वृक्षस्य मूलम्= वृक्षमूलम् । तरोः छाया=तरुच्छाया । देवानां पूजकः=देवपूजकः । सर्वेषां महान्=सर्वमहान् ।

(७) सप्तमीतत्पुरुषः—दाने शौण्डः=दानशौण्डः । कर्मणि कुशलः=कर्मकुशलः । आतपे शुष्कः=आतपशुष्कः । ईश्वरे अधीनः=ईश्वराधीनः ।

कर्मधारयसमासः

अयं तत्पुरुष एवान्तर्भवति । स च अष्टविधः—

(१) विशेषणपूर्वपदः—नीलं च तत् उत्पलं च=*नीलो-

---

* नीलोत्पलादीनि अन्यपदार्थस्य विशेषणत्वेन विवक्षायां बहुव्रीहीकर्तुं शक्याः । यथा—नीलमुत्पलं यस्मिन् तत्—नीलोत्पलम् (सरः) इत्यादि द्रष्टव्यम् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्पलत् । रम्या च सा लता च=रम्यलता । कृष्णश्चासौ सर्पश्च=कृष्णसर्पः । कृष्णाश्च ते सर्पाश्च=कृष्णसर्पाः । वन्याश्च ते जन्तवश्च=वन्यजन्तवः ।

(२) विशेष्यपूर्वपदः—वैयाकरणश्चासौ खसूचिश्च=वैयाकरणखसूचिः । छात्रश्चासौ व्यंसकश्च=छात्रव्यंसकः ।

(३) विशेषणोभयपदः—मन्दश्चासौ शीतलश्च=मन्दशीतलः । भोज्यं च तत् उष्णं च=भोज्योष्णम् ।

(४) उपमानोत्तरपदः—पुरुषः व्याघ्र इव=पुरुषव्याघ्रः । नरः सिंह इव=नरसिंहः । कपिः कुञ्जर इव=कपिकुञ्जरः । राक्षसः ऋषभ इव=राक्षसर्षभः । तनुः लतेव=तनुलता ।

(५) उपमानपूर्वपदः—मेघ इव श्यामः=मेघश्यामः । कौमुदीव विशदा=कौमुदीविशदा । लतेव तन्वी=लतातन्वी । द्राक्षा इव मधुरा=द्राक्षामधुरा ।

(६) सम्भावनापूर्वपदः—आम्र इति वृक्षः=आम्रवृक्षः । विन्ध्य इति पर्वतः=विन्ध्यपर्वतः । यतिः इति व्याजः=यतिव्याजः । देवता इति बुद्धिः=देवताबुद्धिः ।

(७) अवधारणापूर्वपदः—विद्यैव धनम्=विद्याधनम् । अविद्यैव तमः=अविद्यातमः । पाद एव पद्मम्=पादपद्मम् । धर्म एव वृक्षः धर्मवृक्षः । मुखमेव कमलम्=मुखकमलम् ।

(८) मध्यमपदलोपिसमासः—शाकप्रियः पार्थिवः=शाकपार्थिवः । देवपूजको ब्राह्मणः=देवब्राह्मणः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्विगुसमसः

सङ्ख्यापूर्वो द्विगुः । अयमपि तत्पुरुषस्यैव भेदः । स च द्विविधः—

(१) एकवद्भावी द्विगुः—पञ्चानां वटानां समाहारः=पञ्चवटी। त्रयाणां लोकानां समाहारः=त्रिलोकी । पञ्चानां पात्राणां समाहारः=पञ्चपात्रम् । त्रयाणां भुवनानां समाहारः=त्रिभुवनम् ।

(२) अनेकवद्भावी द्विगुः—सप्त च ते ऋषयश्च=सप्तर्षयः ।

अन्येऽपि सन्ति तत्पुरुषसमासस्य भेदाः । यथा—

(१) नञ्तत्पुरुषः—न ब्राह्मणः=अब्राह्मणः । न धर्मः अधर्मः । न अश्वः=अनश्वः । न उदारः=अनुदारः । न कुलमस्य= नकुलः । न क्षरतीति=नक्षत्रम् ।

(२) गतिसमासः—अशुक्लं शुक्लं सम्पद्यमानं भवति= शुक्लीभवति । अशुक्लं शुक्लं सम्पद्यमानं करोति=शक्लीकरोति ।

(३) प्रादिसमासः—प्रगतः आचार्यः=प्राचार्यः । प्रकृष्टो वातः=प्रवातः । अतिक्रान्तो मर्यादाम्=अतिमर्यादः । निर्गतः कौशाम्ब्याः=निष्कौशाम्बिः ॥

(४) उपपदसमासः—कुम्भं करोतीति=कुम्भकारः । साम गायतीति=सामगः । पुत्रं कामयत इति=पुत्रकामः । तन्तुं वयतीति=तन्तुवायः । महीं धरतीति=महीध्रः ।

(५) अस्वपदविग्रहः—चन्द्रेण सदृशः=चन्द्रसङ्काशः, चन्द्रनिभः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहुव्रीहिसमासः

बहुव्रीहिः प्रायेणान्यपदार्थो विशेष्यनिघ्नश्च । यथा—धृतो भारो येन सः=धृतभारः (पुरुषः) । धृतो भारो यया सा=धृतभारा (स्त्री) । धृतो भारो येन तत्=धृतभारम् (शिरः) । एवमन्येऽपि द्रष्टव्याः । स च बहुव्रीहिः अष्टविधः—

(१) *समानाधिकरणबहुव्रीहिः—प्राप्ता विद्या यं सः=प्राप्तविद्यः । ऊढो रथो येन सः=ऊढरथः । दत्तः पशुः यस्मै सः=दत्तपशुः । निष्कान्तः जनः यस्मात् सः=निष्कान्तजनः । श्वेतो वर्णो यस्य सः=श्वेतवर्णः । बहूनि फलानि यस्मिन् सः=बहुफलः । पुण्डरीके इव अक्षिणी यस्य सः=पुण्डरीकाक्षः ॥

(२) **व्यधिकरणबहुव्रीहिः—पद्मं नाभौ यस्य सः=पद्मनाभः । चक्रं पाणौ यस्य सः=चक्रपाणिः । दण्डः पाणौ यस्य सः=दण्डपाणिः । पद्मस्य आभेव आभा यस्य तत्=पद्माभम् । चन्द्रस्य कान्तिरिव कान्तिः यस्य सः=चन्द्रकान्तिः । कुमुदस्य गन्ध इव गन्धो यस्य सः=कुमुदगन्धिः ॥

---

* That is a समानाधिकरणबहुव्रीहि in which both the members are in apposition to each other *i. e.*, have the same case-relation when dissolved.

** A व्यधिकरणबहुव्रीहि is that whose members are not in apposition to each other *i.e.*, are in different cases when dissolved.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(३) सङ्ख्योत्तरपदः—दशानां समीपे ये सन्ति ते=उपदशाः । एवम्—उपैकादश—उपविंश—उपचत्वारिंशप्रभृतयः ॥

(४) सङ्ख्योभयपदः—एको वा द्वौ वा=एकद्वाः । द्वौ वा त्रयो वा=द्वित्राः । त्रयो वा चत्वारो वा=त्रिचतुराः । चत्वारो वा पञ्च वा=चतुष्पञ्चाः । पञ्च वा षट् वा=पञ्चषाः इत्यादयः ॥

(५) *सहपूर्वपदः—पुत्रेण सह वर्तत इति=सपुत्रः, सहपुत्रः । अमात्येन सह वर्तत इति=सामात्यः, सहामात्यः । शिष्येण सह वर्तत इति=सशिष्यः, सहशिष्यः । विद्यया सह वर्तत इति=सविद्यः ॥

(६) दिगन्तराललक्षणः—उत्तरस्याश्च पूर्वस्याश्च दिशोः यत् अन्तरालं सा=उत्तरपूर्वा । एवं दक्षिणपूर्वा, पश्चिमोत्तरा, पूर्वदक्षिणा इत्यादयः ॥

(७) व्यतीहारलक्षणः—बाहुभ्यां बाहुभ्यां प्रहृत्य इदं युद्धं प्रवृत्तमिति=बाहूबाहवि । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तमिति=केशाकेशि । एवं मुष्टीमुष्टि, जङ्घाजङ्घि, जानूजानवि,

---

*The particle सह optionally becomes स in most cases and in certain cases it remains unchanged; सविद्यः सकर्मकः, सपक्षः, etc.

'समान'पूर्वपदोऽप्ययं समासोऽस्ति, यथा—समानः जनपदः यस्य सः=सजनपदः । एवं सनाभिः, सनामा, सगोत्रः सरूपः, सस्थानः,सवर्णः, सवयाः इत्यादयः । अत्र समानशब्दः 'स' इत्येवं परिणमति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दण्डादण्डि, खड्गाखड्गि, मुसलामुसलि, हस्ताहस्ति इत्यादयः ॥

(८) नञ्बहुव्रीहिः—न विद्यते पुत्रः यस्य सः=अपुत्रः । न विद्यते धनं यस्य सः=अधनः । न विद्यते उत्तमः यस्मात् सः=अनुत्तमः ॥

(९) प्रादिबहुव्रीहिः—प्रकृष्टो वातो यस्मिन् सः=प्रवातः (देशः) । निर्गतं धनं यस्मात् सः=निर्धनः । निर्गता घृणा यस्मात् सः=निर्घृणः । उद्गता कन्धरा यस्य सः=उत्कन्धरः । विगताः असवः यस्य सः=व्यसुः ॥

...बहुव्रीहिसमासेऽन्तर्गतानां शब्दानां क्रियाविशेषणत्वेन प्रयोगे तेषां विग्रहवाक्येषु 'यस्मिन् कर्मणि तद्यथा भवति तथा' इत्येतत् योजनीयम् । तथा हि—निर्गता शङ्का यस्मिन् कर्मणि तद्यथा भवति तथा=निश्शङ्कम् । आदरेण सह वर्तते यस्मिन् कर्मणि तद्यथा भवति तथा=सादरम् ॥

अलुक्समासः

समासे पूर्वपदस्य विभक्तिप्रत्ययो यत्र न लुप्यते सोऽलुक्समास इत्युच्यते । अयमलुक्समासः तत्पुरुषे बहुव्रीहौ च सम्भवति ।

तत्पुरुषे यथा—जनुषा अन्धः=जनुषान्धः । एवं शोकान्मुक्तः, वाचोयुक्तिः दास्याःपुत्रः पश्यतोहरः, वनेचरः पङ्केरुहम्, युधिष्ठिरः इत्यादयः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहुव्रीहौ यथा—कण्ठे कालः यस्य सः=कण्ठेकालः ॥

द्वन्द्वसमासः

यत्रोभयोः पदार्थयोः प्राधान्यं स द्वन्द्वः । स च त्रिविधः । यथा—

(१) इतरेतरद्वन्द्वः—रामश्च लक्ष्मणश्च = रामलक्ष्मणौ । हरिश्च हरश्च=हरिहरौ । वापी च कूपश्च तटाकश्च=वापीकूपतटाकाः ॥

(२) समाहारद्वन्द्वः—पाणिश्च पादश्च एतयोः समाहारः=पाणिपादम् । शङ्खश्च पटहश्च एतयोः समाहारः=शङ्खपटहम् । पाणिश्च पादश्च मुखं च एतेषां समाहारः=पाणिपादमुखम् । राजन्याश्च रथाश्च अश्वाश्च एषां समाहारः=राजन्यरथाश्वम् ।

(३) एकशेषसमासः—भ्राता च स्वसा च=भ्रातरौ । पुत्रश्च दुहिता च=पुत्रौ । माता च पिता च: पितरौ । श्वश्रूश्च श्वशुरश्च = श्वशुरौ ॥

अव्ययीभावसमासः

अव्ययीभावसमासे प्रायेण पूर्वपदमव्ययं तदर्थस्य प्राधान्यं च भवति । क्वचित्तु नामशब्दोऽपि पूर्वपदं दृश्यते । अतश्च अव्ययीभावो द्विविधः । यथा—

(१) अव्ययपूर्वपदः—वृक्षे इति=अधिवृक्षम् । नगरस्य समीपे=उपनगरम् । भिक्षाणां समृद्धिः=सुभिक्षम् । मक्षिकाणा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मभावः= निर्मक्षिकम् । अर्थमर्थं प्रति=प्रत्यर्थम् । अहनि अहनि= प्रत्यहम् । समुद्रमभिव्याप्य = आसमुद्रम् । समुद्रस्य मध्ये = मध्येसमुद्रम् । समुद्रस्य पारे = पारेसमुद्रम् । शक्तिमनतिक्रम्य = यथाशक्ति ॥

(२) नामपूर्वपदः—सूपस्य लेशः = सूपप्रति ।

व्युत्पन्नधातवः

सन्नन्ताः (Desideratives)

भू—भवितुमिच्छति = बुभूषति । गम्—गन्तुमिच्छति = जिगमिषति । कृ—कर्तुमिच्छति = चिकीर्षति । दृश् = द्रष्टुमिच्छति = दिदृक्षते । श्रु—श्रोतुमिच्छति = शुश्रूयषते । ज्ञा—ज्ञातुमिच्छति = जिज्ञासते । आप्—आप्तुमिच्छति = ईप्सति । जि—जेतुमिच्छति = जिगीषति ॥

णिजन्ताः (Causals)

भू—भावयति । गम्—गमयति । कृ—कारयति । दृश्—दर्शयति । हन्—घातयति । दा—दापयति इत्यादि ॥

यङन्ताः (Frequentatives)

भू—अतिशयेन भवति = बोभूयते । दीप्—अतिशयेन दीप्यते = देदीप्यते । जि—अतिशयेन जयति = जेजीयते । नृत्—अतिशयेन नृत्यति = नरीनृत्यते ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नामधातवः (Denominatives)

काम्यच्—पुत्रमात्मन इच्छति=पुत्रकाम्यति । यश आत्मन इच्छति=यशस्काम्यति ॥

क्यच्—(१) पुत्रमात्मन इच्छति=पुत्रीयति । यश आत्मन इच्छति=यशस्यति ॥

(२) पुत्रमिवाचरति=पुत्रीयति । पितरमिवाचरति=पित्रीयति । प्रासादे इवाचरति=प्रासादीयति ॥

आचारक्विप्—हंस इवाचरति=हंसति । कृष्ण इवाचरति=कृष्णति ॥

क्यङ्—हंस इवाचरति=हंसायते । कृष्ण इवाचरति=कृष्णायते । सिंह इवाचरति=सिंहायते ॥

क्यष्—लोहितः भवति=लोहितायति-ते । मन्दः भवति=मन्दायति-ते ॥

यक्—कण्डूयति-ते । असूयति । दुःख्यति । सुख्यति ॥

अव्ययप्रकरणम्

येषां शब्दानां लिङ्गसङ्ख्यानिमित्तको रूपभेदो नास्ति तानि 'अव्ययानि' इत्युच्यन्ते । उक्तं च—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ इति ।

व्याकरणशास्त्रानुरोधेन अव्ययान्यपि सुबन्तान्येव । तेभ्यः सुप उत्पत्तिर्लोपश्च विधीयते व्याकरणे । इदानीमव्ययान्युदाहरामः—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अव्ययीभावसमासः सर्वोऽप्यव्ययत्वेन ज्ञेयः। यथा—उपनगरम्, अधिवृक्षम्, मध्येमार्गम्—इत्यादि ॥

विशेषणानि क्रियाविशेषणत्वेन प्रयुज्यमानान्यव्ययानि भवन्ति। यथा—'सुन्दरं गमनम्' इत्यत्र सुन्दरशब्दो विशेषणम्। स एव 'सुन्दरं गच्छति' इत्यत क्रियाविशेषणम्। तस्मात् द्वितीयवाक्ये *'सुन्दरम्' इत्येतत् अव्ययम्। एवमन्यत्रापि द्रष्टव्यम् ॥

सुबन्तप्रतिरूपकाणि कानिचिदव्ययानि दृश्यन्ते। यथा—अस्तम्[1], नमः, स्वस्ति, स्वाहा, स्वधा, शम् इत्यादीनि।

तिङन्तप्रतिरूपकाण्यपि दृश्यन्ते, यथा—अस्ति,[2] नास्ति, अस्मि (अहमित्यर्थे), आह (उवाचेत्यर्थे), आस (बभूवेत्यर्थे) इत्यादीनि ॥

तद्धितान्तेषु—मातृतः[3], पितृतः, आदितः, मध्यतः, स्वरतः

---

* तत्तद्विशेषणशब्दस्य द्वितीयैकवचनं क्रियाविशेषणत्वेन प्रयोक्तव्यमिति नियमः।

१. अस्तम् setting, नमः a bow, salutation, स्वस्ति hail, स्वाहा food offered to gods, स्वधा food offered to the manes, शम् happiness.

२. अस्ति that exists, नास्ति that does not exist, अस्मि I, आह said, आस there was happened.

३. तसिलन्त has the sense of the Ablative—मातृतः from the mother, पितृतः from the father, आदितः from the beginning, मध्यतः from the middle, स्वरतः from the voice.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इत्यादीनि तसिलन्तानि।

ब्राह्मणवत्[1], तद्वत् इत्यादीनि वत्वन्तानि।

अल्पशः[2], बहुशः, खण्डश इत्यादीनि शसन्तानि चाव्ययानि।

कृदन्तेषु[3]—गन्तुम्, कर्तुम्, द्रष्टुम् इत्यदीनि तुमुन्नन्तानि।

गत्वा[4], कृत्वा, दृष्ट्वा इत्यादीनि क्त्वान्तानि।

निर्गत्य[5], संस्कृत्य, सन्दृश्य, इत्यादीनि ल्यबन्तानि च सर्वाण्यव्ययान्येव॥

---

१. वत् is affixed in the sense of 'equally with' or 'like to' when equality or likeness refers to an action—ब्राह्मणवत् equally with a Brahmin, तद्वत् equally with that.

२. अल्पशः little by little, बहुशः mostly, खण्डशः bit by bit.

३. The infinitive—गन्तुं to go, कर्तुं to go, द्रष्टुं to see.

४. The indeclinable past participles—गत्वा having gone, कृत्वा having done, दृष्ट्वा having seen.

५. त्य is added instead of त्वा to roots with prepositions—निर्गत्य having gone out, संस्कृत्य having refined, सन्दृश्य having interviewed.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वनामाव्ययानि

*यत्—यदा when, यत्र where, यथा as, यतः whence, since, because.

तत्—तदा or तदानीम् then, at that time, तत्र there, तथा so, तर्हि then, therefore.

इदम्—इदानीम् now, अत्र here, इत्थम् thus, अतः hence, therefore.

एतत्—एतर्हि now, अत्र here, इत्थम् thus, अतः hence, therefore.

किम्—कदा when ? कुत्र or क्व where ? कथम् how ? कुतः why ? whence ?

सर्व—सर्वदा or सदा always, सर्वत्र everywhere,

---

* The following case-endings of the following pro-nouns are often used as Avyayas in the respective sense as given below—

	Nominative	Instrumental	Ablative.	
यत्—	यत्	येन	यस्मात्	because
तत्—	तत्	तेन	तस्मात्	therefore
इदम्—	—	एतेन	—	hence
पूर्व—	पूर्वम्	—	—	in ancient days.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

in all places, सर्वथा by all means, सर्वतः everywhere, on all sides.

अन्य—अन्यदा in other times, अन्यत्र elsewhere, in another place, अन्यथा otherwise, in a different manner, अन्यतः from elsewere.

एक—एकदा once, once upon a time, एकत्र in one place, एकतः from one place.

अदस्—अमुत्र there, in the next world, अमुतः from that place or person.

पर—परत्र in the next word, in another place, परतः further on, beyond.

अपर—अपरत्र in another place, अपरथा in another manner, अपरतः from another place.

पूर्व—पूर्वत्र in the preceding part, previously, पूर्वतः from the previous place, in front.

उभय—उभयत्र in both places, उभयथा in both ways, उभयतः from both sides.

उत्तर—उत्तरत्र subsequently, उत्तरतः from the north, उत्तरेण to the north.

दक्षिण—दक्षिणतः from the south, दक्षिणेन to the south.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सङ्ख्याव्ययानि

सकृत् once, द्विः twice, त्रिः thrice, चतुः four times, पञ्चकृत्वः five times etc.*

एकधा in one way, द्विधा or द्वेधा in two ways, त्रिधा or त्रेधा in three ways, चतुर्धा in four ways, पञ्चधा in five ways, षड्धा or षोढा in six ways, सप्तधा, अष्टधा etc.

एकशः one by one, द्विशः two and two, by twos, त्रिशः, चतुश्शः, पञ्चशः, शतशः, सहस्रशः etc.

कालवाचकान्यव्ययानि

अद्य	to-day
अद्यत्वे	now-a-days
श्वः	to-morrow
परश्वः	day after to-morrow
ह्यः	yesterday
परेद्युः, परेद्यवि	next-day
अपरेद्युः	on the following day
पूर्वेद्युः	previous day
अन्येद्युः	the other or following day

---

* By adding कृत्वः to any number, similar multiples are fomed. 'वारं' also may be added to numbers to form similar multiples as एकवारम्, दशवारम् etc.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्यतरेद्युः on one of the two days

इतरेद्युः on another day

उत्तरेद्युः on the following day

उभयद्युः, उभयेद्युः on both days

सद्यः at once

अधुना, सम्प्रति now

पुरा in olden days

ऐषमः this year

परुत् last year

परारि the year before the last

अन्यानि कानिचिदव्ययानि

अकस्मात् suddenly, all at once

अङ्ग well, friend

अजस्रम् constantly

अञ्जसा correctly, justly

अतीव exceedingly

अथ, अथो then, afterwards

अथकिम् what else, yes

अथवा or, rather

अद्धा truly, certainly

अधः, अधस्तात् below, down

अनिशम् incessantly

अन्तः in, into

अन्ततः at last, from the end

अन्तरा, अन्तरेण except, without

अन्यच्च, अपरंच moreover, besides

अपि even

अभितः near, close by

अभीक्ष्णम् frequently

अर्वाक् before

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अलम् enough of, sufficient for

अवश्यम् necessarily

अहर्निशम् day and night

अह्नाय at once

आरात् near, at a distance

आम् yes

आहत्य on the whole

आहोस्वित्
उत
उताहो } or

इति thus, in this manner

इतिह in confirmity to tradition

इव like, as

ईषत् slightly

उच्चैः loudly

उपरि
उपरिष्टात् } on, over

ऋते without, except

एकपदे at once, suddenly

एव just, quite

एवम् thus, so

ओं so be it

कदाचन
कदाचित् } once

कथञ्चन
कथञ्चित् } with great difficulty

कथंनाम how indeed, how possibly

कामम् to one's satisfaction

किङ्किल what a pity

किञ्च moreover

किन्तु but, yet, however, nevertheless

किन्नु what indeed, whether

किमुत how much more

किंवा or

किंस्वित् what, how

किल verily, indeed

किमु what then, how much more

कृतम् enough, no more of

केवलम् only, merely, simply

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कचन, क्वचित्, कुत्रचित्, कुत्रचन — in some place

खलु certainly, surely

च and

चिरम्, चिरेण, चिराय, चिरात्, चिरस्य — for a long time

चिररात्राय for a period of many nights

चेत् if

जातु perhaps, sometimes

जोषम् silently

झटिति, झडिति, झगिति — quickly, at once

तथा च so

तथापि even then, still, yet

तथा हि as for instance

तथैव even so, just so

तदनु then

तरसा forcibly, suddenly

तावत् so much, that much

तिर्यक् crookedly, across

तूष्णीम् silently

दिवा by day

दिष्ट्या fortunately

दुष्ठु ill, in a bad manner

दूरम् deeply

दोषा at night

द्राक् quickly, forthwith

धिक् what a pity

ध्रुवम् surely, certainly

नक्तम् by night

न not

ननु indeed, surely, certainly, is it not

न कदाचित् never

न हि not at all

नाम by name, indeed, certainly, probably, perhaps

निकषा near, close by

निकामम् very much, to one's satisfaction

नितान्तम् excessively

नीचैः low, below, gently

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नूनम् certainly, assuredly, most probably

नचेत्, नोचेत् } if not

परम्, परंतु } but

परितः around, on all sides, all round

पश्चात् behind, backwards, at last, afterwards

पुनः again

पुरः, पुरस्तात् } in front

पृथक् individually

प्रकामम् exceedingly, at will

प्रत्युत on the contrary; on the other hand

प्रसह्य forcibly

प्रातः in the morning

प्रायः, प्रायेण } mostl y

वलवत्, चलात् } foreibly, powerfully

बहिः out, beside

भूयः exceedingly, repeatedly

भृशम् greatly

मङ्क्षु quickly, immediately

मनाक् a little

मा, मास्म } do not

माचिरम् without delay

मिथः to each other, secretly

मिथ्या wrongly, incorrectly

मुधा to no purpose, in vain

मृषा falsely

यदि if

यावत् as much as, as many as, till when, until

युगपत् simultaniously

वा or

विना without

वृथा in vain

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वै verily, to be sure
शनैः gently, slowly
शश्वत् always
सततम्
सन्ततम् } always
सपदि at once
समन्ततः on all sides
सम्यक् well, in a good manner
सह together with, along with
सहसा at once, suddenly
संवत् year
साकम् with
साचि crookedly, in a side long manner
सार्धम् with
साक्षात् in the presence of, in person
सामि half
साम्प्रतम् now, fitly, properly
सायम् in the evening
सुष्ठु well, in a good manner
स्थाने rightly, in the right place
स्वयम् oneself, spontaneously
स्वः heaven
हंहो ho, hallo
हन्त alas
हा ho
हि because, indeed, surely

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शब्दार्थकोशः—GLOSSARY

This follows Śabda order:—

१. राम Rama
कृष्ण Krishna
मुकुन्द Vishnu
शिव Siva
हर Siva

२. हरि Vishnu
रवि the Sun
कवि a poet
मुनि a sage
विधि the creator, fate, a rule, method

३. पति a master, husband

४. सखा a friend

५. गुरु preceptor
शम्भु Siva
विष्णु Vishnu
भानु the Sun
सूनु a son

६. कर्ता a doer, one who makes, performs etc.
धाता the creator
दाता a giver, a donor
भर्ता a husband, a master
वक्ता a speaker, an orator

७. पिता a father
भ्राता a brother
जामाता a son-in-law
देवा a husband's brother
ना a man
सव्येष्ठा a charioteer

८. राः wealth

९. गौः a bull or a cow

१०. ग्लौः the Moon

११. रमा the goddess of wealth
माला a garland, a wreath
सीता Sita
क्षमा patience, forbearance,
लज्जा shame, bashfulness

१२. मति intellect
श्रुति hearing, the ear, the Veda

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्मृति remembrance, law-book
रुचि taste
बुद्धि intelligence
१३. नदी a river
गौरी Parvati
वाणी speech, Sarasvati
सखी a female friend
देवी a goddess, a crowned queen
लक्ष्मी the goddess of wealth
तरी a boat
तन्त्री a lute
१४. धी intellect
ह्री shame
श्री wealth, goddess of wealth
भी fear
१५. स्त्री a woman
१६. धेनु a cow
तनु the body
इषु an arrow
रज्जु a rope, a cord

चञ्चु a beak
१७. वधू a bride, a w
चमू an army
श्वश्रू a mother-i
१८. भू the earth
भ्रू eye-brow
सुभ्रू a lovely w
१९. स्वसा a sister
२०. माता a mother
याता a husb brother's
दुहिता a daught
ननान्दा a husb
२१. द्यौः the sky
२२. राः wealth
२३. नौः a boat
२४. फल a fruit
ज्ञान knowledge
वन a forest
धन wealth
नेत्र an eye
२५. वारि water
२६. दधि curds

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.